BIBLIOTHECA REGIA MONACENSIS.

VALUABLE ORIENTAL WORKS

OF THE

ASIATIC SOCIETY OF BENGAL,

Published in London by

Wm. H. Allen & Co., 7, Leadenhall Street.

The Supreme Government of India having transferred to the Asiatic Society of Bengal, the Oriental Works which have been either wholly or in part published in Calcutta, under the authority of the General Committee of Public Instruction, the Society is enabled to direct the disposal of them at the

FOLLOWING REDUCED PRICES.

---

1. MOOLUKHKHUS-OOL-TUWAREEKH, being an Abridgment of the celebrated Historical Work called the Seir Mootakherin, prepared chiefly by Maulavi Abdool Kerim. (Persian). Royal 4to. £1. 5s. boards.

2. MOOJIZ-OOL-QANOON: a Medical Work, by Alee bin Alee Il Huzm, the Karashite, commonly known by the name of Ibn-ool-Nufees. (Arabic). 4to. 10s. 6d. boards.

3. BHATTI KAVYA; a Poem, on the Actions of Rama; with the Commentaries of Jayamangala and Bharatamallika. (Sanscrit). 2 vols. Royal 8vo. £1. 10s. boards.

4. LAGHU KAUMUDI: a Sanscrit Grammar, by Vadaraja. Royal 12mo. 5s. 6d. boards.

5. MUGDHABODHA: a Sanscrit Grammar, by Vopadeva. Royal 12mo. 5s. 6d. boards.

6. NYAYA SUTRA VRITTI: the Logical Aphorisms of Gotama, with a Commentary by Viswanáth Battáchárya. (Sanscrit). 8vo. 5s. 6d. boards.

7. BHASHA PARICHHEDA and SIDDHANTA MUKTAVALI: an Elementary Treatise on the Terms of Logic, with its Commentary, by Viswanatha Panchanana Bhatta. (Sanscrit.) Royal 8vo. 5s. 6d. boards.

8. LILAVATI: a Treatise on Arithmetic, translated into Persian from the Sanscrit work of Bhascara Acharya, by the celebrated Feizi. Royal 8vo. 5s. boards.

Ditto ditto, in Sanscrit. Royal 8vo. 5s. sewed.

9. SELECTIONS, Descriptive, Scientific, and Historical; translated from English and Bengalee into Persian, for the use of Native Youth. Royal 8vo. 7s. 6d. boards.

Digitized by Google

10. SAHITYA DERPANA: a Treatise on Rhetorical Composition, by Viswanath Kaviraja. (Sanscrit). Royal 8vo. 9s. boards.

11. FUTAWA ALEMGIRI: a Collection of Opinions and Precepts of Mohammedan Law, compiled by Sheikh Nazim and other learned men, by command of the Emperor Aurungzeb Alemgir. (Arabic). 6 vols. Royal 4to. £9.

Ditto ditto, Vol. 1 to 4, separate. £1. 10s. each.

"The *Fatáwá Álemgírí* being four times the size of the Hidayah, and containing little more than a recital of law cases, without the arguments and proofs which are diffusely stated in the Hidayah, it must possess an advantage over that work, for practical use, in its greater number of cases and examples. Without contrasting their respective merits, however, the one is universally admitted to be a most useful supplement to the other; and a conversance in both, or an easy means of reference to them in cases of judicial occurrence, must be of essential use towards the due administration of the Mahommedan law, as far as that law is declared to be the established rule and standard of decision."—*Harington's Remarks on the Authorities of Mohammedan Law.* As. Res. X. 475.

12. Short ANATOMICAL DESCRIPTION of the HEART, extracted from the Edinburgh Medical Dictionary, and translated into Arabic, by JOHN TYTLER. 8vo. 2s. boards.

13. DAYA TATWA: a Treatise on the Law of Inheritance, by Raghunandana Bhattáchárya. Edited by Lakshmi Náráyan Serma. (Sanscrit). 8vo. 2s. 6d. boards.

14. DAYA KRAMA SANGRAHA: a Compendium of the Order of Inheritance, by Krishna Terkalankara Battáchárya. Edited by Lakshmi Náráyan Serma. (Sanscrit). 8vo. 2s. 6d. boards.

15. DAYA BHAGA, or Law of Inheritance: a new Edition, with a Commentary by Krishna Terkalankara. (Sanscrit). 8vo. 8s. boards.

16. KAVYA PRAKASA: a Treatise on Poetry and Rhetoric, by Mammata Acharya. (Sanscrit). 8vo. 5s. 6d. boards.

17. VEDANTA SARA: Elements of Theology, according to the Vedas, by Sadánanda Parivrajakácháryya; with a Commentary, by Ramakrishna Tirtha. (Sanscrit). 8vo. 5s. 6d. boards.

18. VYAVAHARA TATWA: a Treatise on Judicial Proceedings, by Raghunandana Bhattáchárya. Edited by Lakshmi Narayan Serma. (Sanscrit). 8vo. 2s. 6d. boards.

19. CH,HUTRU PRUKASH: a Biographical Account of Ch,hutru Sal, Raja of Boondelkhund, by Lal Kuvi. Edited by Capt. W. PRICE. (Brij Bhakha). 8vo. 8s. boards.

20. The KIFAYA, a Commentary on the Hidayah: a Treatise on the Questions of Mohammadan Law, by Hukeem Mouluvee Abdool Mujeed, and other learned men of Calcutta. (Arabic). Vols. 3 and 4. 4to. £3. sewed.

21. The INAYAH: a Commentary on the Hidayah: a Work on Mohummudan Law, compiled by Mohummud Akmulooddeen, Ibn Muhmood, &c. Edited by Moonshee Ramdhun Sen: with the aid of Mouluvees Hafiz Ahmud Kubeer, Futuh Ulee, and others. (Arabic). Vols. 3 and 4. 4to. £3. sewed. The second volume now in hand.

22. MITAKSHARA: a Compendium of Hindu Law, by Vijnáneswara: founded on the Texts of Yajnawalkya. The Vyavahara Section, or Jurisprudence. Edited by Sri Lakshmi Naráyán Nyayalancara. (Sanscrit). 8vo. 9s. 6d. sewed.

Digitized by Google

23. RAGHU VANSA, or Race of Raghu: a Historical Poem, by Kálidása, with a Prose Interpretation of the Text by Pundits of the Sanscrit College of Calcutta. (Sanscrit). Royal 8vo. 14s. sewed

24. ASHSHURH-OOL-MOOGNEE, COMMENTATIO ABSOLUTA: a Commentary on the Moojiz ool Kanoon, known by the name of The Sudeedee, compiled by the celebrated Physician Maulana Sudeed Kazroonee, on the Theory and Practice of Physic and the Materia Medica, &c. Edited by Hukeem Mouluvee Abbool Mujeed, and others. (Arabic). 4to. £1. 10s. sewed.

25. The MAHABHARATA: an Epic Poem, written by the celebrated Veda Vyása Rishi. Vol. 1. (containing the Adi Parva—Sabha Parva—Vana Parva). Edited by learned Pundits. Royal 4to. £1. 10s. sewed. To be completed in Five Volumes.

"The Mahábhárat details the dissensions of the *Pándava* and *Kaurava* princes, who were cousins by birth, and rival competitors for the throne of Hastinapur. The latter were at first successful, and compelled the former to secrete themselves for a season, until they contracted an alliance with a powerful prince in the Panjáb, when a part of the kingdom was transferred to them. Subsequently this was lost by the *Pándavas* at dice, and they were driven into exile, from which they emerged to assert their rights in arms. All the princes of India took part with one or other of the contending kinsmen, and a series of battles ensued at *Kuru Kshetra*, the modern *Tahnesar*; which ended in the destruction of Daryodhana and the other *Kaurava* princes, and the elevation of Yudhishthira, the elder of the *Pándava* brothers, to the supreme sovereignty over India."—*Wilson*, As. Res. xvii. 609.

26. The RA'JA TARANGINI, a History of Cashmir. (Sanscrit). Royal 4to. £1. 5s. sewed.

"The only Sanscrit composition yet discovered to which the title of history can with any propriety be applied, is the *Rája Tarangini*, a History of Cashmir. This work was first introduced to the knowledge of the Mahomedans by the learned minister of Akber, Abulfazl, who has given a summary of its contents, taken from a Persian translation prepared by order of Akber." "Mr. Gladwin's English version of this abstract excited curiosity and stimulated inquiry, but the result was unsatisfactory, and a long period intervened before the original work was discovered. Sir William Jones was unable to meet with it, although the history of India from the *Sanscrit Cashmír* authorities was amongst the tasks his undaunted and indefatigable intellect had planned; it was not until the year 1805 that Mr. Colebrooke was successful in his search. He procured a copy of the work from the heirs of a brahmin who died at Calcutta, and about the same time another transcript was obtained by Mr. Speke from Lucknow. I purchased a third brought for sale to Calcutta; and I have been hitherto unable to meet with any other transcript of this version."—*Wilson's Essay on the History of Cashmír.* As. Res. xvi. 1.

27. The SUSRUTA, or System of Medicine, taught by Dhanwantari, and composed by his disciple Susruta (Sanscrit). Vol. I. 8vo.; 9s., to be completed in two volumes.

"The author of the *Sausruta*, which ranks the second work in antiquity, and is decidedly the first in merit of the Hindu writers on the medical art. Susruta is the only one who attempts to lay down a systematic course of proceeding (in cases of leprosy)."—*Wilson on Kushta or Leprosy, as known to the* HINDUS, Trans. Med. Soc. Cal. i. 26.

28. The JAWA'ME UL ILM UL RIYAZI', an Arabic translation of Hutton's Mathematics, by Dr. J. Tytler. Part I. Arithmetical Notation to Tables of Powers and Roots. 4to., 9s.

29. MRICHCH,HAKATI, a Comedy, by Sudraka Raja; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 12s. sewed.

30. UTTARA RAMA CHERITRA, or Continuation of the History of Rama: a Drama, in Seven Acts, by Bhavabhuti; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

31. MALATI and MADHAVA: a Drama in Ten Acts, by Bhavabhuti; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

32. MUDRA RAKSHASA, or the Signet of the Minister; a Drama in Seven Acts, by Visakha Datta; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

33. RETNAVALI, a Drama in Four Acts, by Shri Hersha Deva;

Digitized by Google

with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

34. VIKRAMORVASI, or Vikrama and Urvasi: a Drama, by Kálidása; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. sewed.

Works in Progress.

1. The NAISHADA, a popular Sanscrit Poem, with Commentary by a Pandit of the Government Sanscrit College. In 8vo.; 600 pages, or one-third of the whole, printed.

"This poem is universally read by students of the Sanscrit language, as a poetical class book. It was on this account recommended for publication to the Committee of Instruction. It bears the name of Sri Harsha, whose reputation rests altogether on this pleasing and popular version of the famed episode of Nala and Damayanti, a subject which has also engaged the pens of other celebrated Indian writers, after its first narration in the Mahábhárata.

2. The SARIRA VIDYA, a Sanscrit translation of Hooper's Vade-Mecum, by Madan Mohan, Physician to the Sanscrit College. In 8vo.; one quarter printed.

3. The KHA'ZA'NAT UL ILM. (Persian). 1 vol. large 4to., 620 pages, with numerous Lithographed Plates; one-fifth remains to be completed, which will occupy ten months.

Of this work, it is unnecessary to say more than that it contains a whole course of European mathematical and geometrical instruction, drawn up in Persian by Khán Jí, a learned native Munshi at Patna, since dead, aided by Dr. J. Tytler. It was intended, and is particularly well adapted, for the use of Seminaries, where the Persian language is read.

4. The ANIS UL MASARRAHI'N, an Arabic translation of Hooper's Vade-Mecum, by Dr. J. Tytler. In 4to., 320 pages. The Index or Glossary of Terms remains unfinished.

It is unnecessary to add (for the English reader) any notice of Dr. Tytler's translations of Hutton's Mathematics and Hooper's Vade Mecum into Arabic. The great learning of the Translator is sufficient warrant of his having executed his task in the best manner.

5. A TREATISE on ALGEBRA, in Arabic, proceeding on the basis of a translation of Bridge's Treatise, but much modified and enlarged: with an Appendix on the application of Analysis to Geometry and Trigonometry, by the Rev. Dr. Mill. 8vo., printed at Bishop's College. The first and second parts finished, to the end of Plane Trigonometry: the continuation of the Appendix to Spherics remains to be passed through the press.

A DICTIONARY, TIBETAN and ENGLISH, prepared with the assistance of the Bandé Sangs-Rgyas Phun-Tshogs, a learned Lama of Zangskár, by ALEXANDER CSOMA DE KÖRÖS. In 4to.; 25s. sewed.

A GRAMMAR of the TIBETAN LANGUAGE, in ENGLISH, by Alexander Csoma de Körös. In 4to.; 18s. sewed.

ASIATIC RESEARCHES; or Transactions of the Society, instituted in Bengal, for inquiring into the History, the Antiquities, the Arts and Sciences, and Literature of Asia. Vols. 17 and 18. Royal 4to.; £2. 2s. each, boards. Also, former volumes.

INDEX to ASIATIC RESEARCHES. Royal 4to. 15s. sewed.

JOURNAL of the ASIATIC SOCIETY of BENGAL. January 1832, to December 1835. 2s. 6d. each.

Digitized by Google

Digitized by Google

Digitized by Google

THE

BHASHA PARICHHEDA,

AND

SIDDHANTA MUKTAVALI.

AN ELEMENTARY TREATISE

ON THE TERMS OF

Logic,

WITH ITS COMMENTARY.

BY

Viswanatha Panchanana Bhatta.

PUBLISHED FOR THE USE OF THE

Sanscrit College,

UNDER THE AUTHORITY OF THE COMMITTEE OF

PUBLIC INSTRUCTION.

Calcutta:

PRINTED AT THE EDUCATION PRESS.

1827.

Digitized by Google

Digitized by Google

भाषापरिच्छेदः ॥

नमोगणेशाय ॥

नूतनजलधररुचये गोपवधूटीदुकूलचौराय।
तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय ॥ १ ॥
द्रव्यं गुणास्तथा कर्म्म सामान्यं सविशेषकं। समवा
यस्तथाभावः पदार्थाः सप्त कीर्त्तिताः ॥ २ ॥ चित्य
प्तेजोमरुद्व्योमकालादिग्देहिनौ मनः। द्रव्याण्यथ
गुणारूपं रसोगन्धस्ततः परं ॥ ३ ॥ स्पर्शः संख्या
परिमितिः पृथक्त्वञ्च ततः परं। संयोगश्च विभागश्च
परत्वञ्चापरत्वकं॥४॥बुद्धिः सुखं दुःखमिच्छा द्वेषोय
त्नोगुरुत्वकं। द्रवत्वं स्नेहसंस्कारावदृष्टं शब्दएव च
॥५॥उत्क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा। प्रसा
रणञ्च गमनं कर्म्माण्येतानि पञ्च च ॥६॥भ्रमणं रेच
नं स्यन्दनोर्द्ध्वज्वलनमेव च।तिर्य्यग्गमनमथत्र गम
नादेव लभ्यते ॥ ७ ॥सामान्यं द्विविधं प्रोक्तं परञ्चा
परमेव च। द्रव्यादिवृत्तिरेषु सत्तापरतयोच्च

ते॥८॥परभिन्ना च या जातिः सैवापरतयोच्यते। द्रव्यत्वादिकजातिस्तु परापरतयोच्यते॥९॥व्याप कत्वात्परापि स्याद्व्याप्यत्वादपरापि च। अन्योनित्य द्रव्यवृत्तिर्विशेषः परिकीर्त्तितः॥१०॥ घटादीनां कपालादौ द्रव्येषु गुणकर्म्मणोः। तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः॥११॥ अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः। प्रागभावस्तथा ध्वं सोऽप्यत्यन्ताभावएव च॥१२॥ एवं वैविध्यमापन्नः संसर्गाभावउच्यते। सप्तानामपि साधर्म्यं ज्ञेयत्वादि कमुच्यते॥१३॥ द्रव्यादयः पञ्च भावाश्चनेके सम वायिनः। सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुण क्रियः॥१४॥ सामान्यपरिहीनास्तु सर्व्वे जात्याद योमताः। पारिमाण्डल्यभिन्नानां कारणत्वमुदाह तं॥१५॥ अन्यथासिद्धिशून्यस्य नियता पूर्व्ववर्त्ति ता। कारणत्वं भवेत्तस्य वैविध्यं परिकीर्त्तितं॥१६॥ समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वं। एवं व्यायनयश्चैतृतीयमुक्तं निमित्तहेतुत्वं॥१७॥ यत्स मवेतं कार्य्यं भवति ज्ञेयन्तु समवायिजनकं तत्। तच्चासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात्॥१८॥येन सह पूर्व्वभावः कारणमादाय वा यस्य।

Digitized by Google

अन्यं प्रति पूर्व्वभावे ज्ञाते यत्पूर्व्वभावविज्ञानं ॥१९॥ जनकं प्रति पूर्व्ववर्त्तितामपरिज्ञाय न यस्य यत्क्षणे। अतिरिक्तमथापि यद्भवेन्द्रियतावच्छेकपूर्व्व भाविनः ॥ २० ॥ एते पञ्चान्यथासिद्धादण्डत्वादि क्रमादिमं। घटादौ दण्डरूपादि द्वितीयमपि दर्शि तं ॥ २१ ॥ तृतीयन्तु भवेद्ग्रीम कुलालजनकोऽपरः। पञ्चमोरासभादिः स्यादेतेष्वावच्छेकस्त्रयी ॥ २२ ॥ समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयं। गुणकर्म्मसा मान्यवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वं ॥ २३ ॥ अन्यत्र नित्यद्रव्येभ्यआश्रितत्वमिहोच्यते। क्षित्यादीनां स वानान्तु द्रव्यत्वगुणयोगिता ॥ २४ ॥ क्षितिर्जलंतथा तेजः पवनोमनएव च । परापरत्वमूर्त्तत्वक्रियावे गाश्रयाश्रमी ॥ २५ ॥ कालखात्मदिशां सर्व्वगतत्वं परमं महत्। क्षित्यादिपञ्चभूतानि चत्वारि स्पर्शव न्ति हि ॥ २६ ॥ द्रव्यारम्भश्चतुर्षु स्यादयाकाशशरीरि णां। अव्याप्यवृत्तिः क्षणिकोविशेषगुणइष्यते ॥ २७ ॥ रूपद्रवत्वप्रत्यक्तयोगि स्यात्प्रथमत्रिकं । गुरुणी द रसवती द्वयोर्नैमित्तिकोद्रवः ॥ २८ ॥ आत्मानोभू तवर्गाश्च विशेषगुणयोगिनः। यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥ २९ ॥ स्पर्शाद्योऽष्टौ वेगा

स्पर्शसंस्कारोमरुतोगुणाः । अष्टौ स्पर्शादयोरूर्ध्वं द्रवोवेगश्च तेजसि॥ ३०॥ स्पर्शादयोऽष्टौ वेगश्च गुरुत्वञ्च द्रव्यत्वकं । रूपं रसस्तथा स्नेहोवारिण्येते चतुर्दश॥ ३१॥ स्नेहहीनागन्धयुताः क्षितावेते चतुर्दश। बुद्ध्यादिषट्कं संख्यादिपञ्चकं भावना तथा॥ ३२॥ धर्माधर्मौ गुणाएते आत्मनः स्युश्चतुर्दश । संख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे॥ ३३॥ संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे । परापरत्वं संख्याद्याः पञ्च वेगश्च मानसे ॥ ३४॥ तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता। षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥ ३५॥ स्पर्शस्तु स्यात्तु विज्ञेयोह्यनुष्णाशीतपाकजः । नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा॥ ३६॥ अनित्या तु तदन्या स्यात् सैवावयवयोगिनी। सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥ ३७॥ योनिजादि र्भवेद्देहइन्द्रियं घ्राणलक्षणं । विषयोद्व्यणुकादिश्च ब्रह्माण्डान्तउदाहृतः॥ ३८॥ वर्णः शुक्लोरसस्य स्यौ जले मधुरशीतलौ। स्नेहस्तत्र द्रवत्वन्तु सांसिद्धिकमुदाहृतं ॥ ३९॥ नित्यतादिप्रथमवत् किन्तु देहमयोनिजं। इन्द्रियं रसनं सिध्दिमादिर्विषयो

मतः ॥४०॥ स्पर्शउष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरं।
नैमित्तिकं द्रवत्वन्तु नित्यतादि च पूर्ववत् ॥४१॥
इन्द्रियं नयनं वह्निस्वर्णादिर्विषयोमतः। अपाकजो
ऽनुष्णाशीतः स्पर्शस्तु पवने मतः ॥४२॥ तिर्य्यग्गम
नवानेषश्चेयः स्पर्शादिलिङ्गकः। पूर्ववन्नित्यतायु
क्तं देहव्यापि त्वगिन्द्रियं ॥४३॥ प्राणादिस्तु म
हा वायुपर्य्यन्तोविषयोमतः। आकाशस्य तु विज्ञेयः
शब्दोवैशेषिकोगुणः ॥४४॥ इन्द्रियन्तु भवेत् श्रोत्र
मेकः सन्नप्युपाधितः। जन्यानां जनकः कालोज
गतामाश्रयोमतः ॥४५॥ परापरत्वधीहेतुः क्षणा
दिः स्यादुपाधितः। दूरान्तिकादिधीहेतुरेका नित्या
दिगुच्यते ॥४६॥ उपाधिभेदादेकापि प्राच्यादिव्य
पदेशभाक्। आत्मेन्द्रियाद्यधिष्ठाता करणं हि सक
र्तृकं ॥४७॥ शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः।
तथात्वञ्चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥४८॥
मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्।
धर्माधर्माश्रयोऽध्यक्षोविशेषगुणयोगतः ॥४९॥
प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः। अहङ्कार
स्याश्रयोऽयं मनोमात्रस्य गोचरः ॥५०॥ विभुर्बुद्धा
दिगुणवान् बुद्धिस्तु द्विविधा मता। अनुभितिः स्मृति

Digitized by Google

स च स्यादनुभूतिश्चतुर्विधा ॥ ५१ ॥ प्रत्यक्षमप्यनुमि
तिस्तथोपमितिश्चब्दजे । घ्राणजादिप्रभेदेन प्रत्य
क्षं षड्विधं मतं ॥ ५२ ॥ घ्राणस्य गोचरोगन्धोगन्ध
त्वादिरपि स्मृतः । तथा रसोरसज्ञायास्तथा शब्दो
ऽपि च श्रुतेः॥ ५३॥ उद्भूतरूपं नयनस्य गोचरोद्रव्या
णि तदन्ति पृथक्त्वसंख्या। विभागसंयोगपरापरत्वसे
द्द्रवत्वं परिमाणयुक्तं ॥ ५४ ॥ क्रियां जातिं योग्य
वृत्तिं समवायञ्च तादृशं । गृह्णाति चक्षुः संयोगा
दालोकोद्भूतरूपयोः॥ ५५ ॥ उद्भूतस्पर्शवद्द्रव्यं गोच
रः सोऽपि च त्वचः । रूपान्यच्चक्षुषोयोग्यं रूपमत्रा
पि कारणं ॥ ५६ ॥ द्रव्याश्रये त्वचोयोगोमनसा
ज्ञानकारणं । मनोग्राह्यं सुखं दुःखमिच्छा द्वेषोमतिः
कृतिः ॥ ५७ ॥ ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रिय
मिष्यते। सद्दत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतं ॥ ५८॥
विषयेन्द्रियसम्बन्धोव्यापारः सोऽपि षड्विधः। द्रव्य
ग्रहस्तु संयोगात् संयुक्तसमवायतः॥ ५९ ॥ द्रव्येषु
समवेतानां तथा तत्समवायतः। तत्रापि समवेतानां
शब्दस्य समवायतः ॥ ६० ॥ तद्वृत्तीनां समवेतसम
वायेन तु ग्रहः। विशेषणतया तद्द्द्भावानां ग्रहो
भवेत्॥६१॥यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते।

Digitized by Google

प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥ ६२ ॥ अ
लौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः । सामान्य
लक्षणा ज्ञानलक्षणा योगजस्तथा ॥ ६३ ॥ आसन्नि
राश्रयाणान्तु सामान्यज्ञानमिष्यते । तदिन्द्रियजन
द्वर्म्मबोधसामग्र्यपेक्षते ॥ ६४ ॥ विषयी यस्य तस्यै
व व्यापारोज्ञानलक्षणा । योगजोद्विविधः प्रोक्तो
युक्तयुञ्जानभेदतः ॥ ६५ ॥ युक्तस्य सर्व्वदा भानं
चिन्तासहकृतोऽपरः । व्यापारस्तु परामर्शः करणं
व्याप्तिधीर्भवेत् ॥ ६६ ॥ अनुमायां ज्ञायमानं लिङ्ग
न्तु करणं नहि । अनागतादिलिङ्गेन न स्यादनु
मितिस्तदा ॥ ६७ ॥ व्याप्तस्य पक्षवृत्तित्वधीः परामर्श
उच्यते । व्याप्तिस्तु साध्याभाववदवृत्तित्वं प्रकीर्त्ति
तं ॥ ६८ ॥ यद्वा साध्यवदन्यस्मिन्नसम्बन्ध उदाह
तः । अथवा हेतुमन्निष्ठविरहाप्रतियोगिना ॥ ६९ ॥
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते । सिषा
धयिषया शून्य सिद्धिर्यत्र न विद्यते ॥ ७० ॥ सपक्ष
सत्त्व वृत्तित्वज्ञानादनुमितिर्भवेत् । अनैकान्तो
विरुद्धश्चाप्यसिद्धः प्रतिपादितः ॥ ७१ ॥ कालात्ययो
पदिष्टश्च हेत्वाभासास्तु पञ्चधा । आद्यः साधार
णस्तु स्यात् स्यादसाधारणोमतः ॥ ७२ ॥ तथैवा

नुपसंहारी त्रिधानैकान्तिकोभवेत् । यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः ॥ ७३ ॥ यस्त्वभयस्मात् व्यावृत्तः सचासाधारणोमतः । तथैवानुपसंहारी केवलान्वयिपक्षकः ॥ ७४ ॥ यः साध्यवति नैवास्ति सविरुद्धउदाहृतः । आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ ॥ ७५ ॥ व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा । पक्षासिद्धिर्यत्र पक्षोभवेन्मणिमयोगिरिः ॥ ७६ ॥ ह्रदोद्रव्यं धूमवत्त्वाद्यासिद्धिरथापरा । व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ॥ ७७ ॥ विरुद्धयोः परामर्शोहेत्वोः सत्प्रतिपक्षिता । साध्यशून्यो यत्र पक्षस्त्वसौ बाधउदाहृतः ॥ ७८ ॥ उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते । ग्रामीणस्य प्रथमतः पश्यतोगवयादिकं ॥ ७९ ॥ सादृश्यधीर्गवादीनां या स्यात्सा कारणं मतं । वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापारउच्यते ॥ ८० ॥ गवयादिपदानान्तु शक्तिधीरुपमाफलं । पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः ॥ ८१ ॥ शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी । लक्षणा शक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः ॥ ८२ ॥ आसत्तियोग्यताकाङ्क्षा तात्पर्य्यज्ञानमिष्यते । कारणं सन्निधानन्तु पदस्यो

सत्तिरुच्यते ॥ ८३ ॥ पदार्थे तच्च तदत्ता योग्यता परिकीर्त्तिता । यत्पदेन विना यस्यानुभावकता भवेत् ॥ ८४ ॥ आकाङ्क्षा वक्तुरिच्छा तु तात्पर्य्यं परिकीर्त्तितं । साक्षात्कारे सुखादीनां करणं मनउच्यते ॥ ८५ ॥ अयौगपद्याज्ज्ञानानां तस्याणुत्वमिष्यते । अथ द्रव्याश्रिताज्ञेयानिर्गुणानिष्क्रियागुणाः ॥ ८६ ॥ रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकं । द्रवोगुरुत्वं स्नेहश्च वेगोमूर्त्तगुणाअमी ॥ ८७ ॥ धर्म्माधर्म्मौ भावना च शब्दोबुद्ध्यादयोऽपि च । एतेऽमूर्त्तगुणाः सर्व्वे विद्वद्भिः परिकीर्त्तिताः ॥ ८८ ॥ संख्यादिश्च विभागान्तउभयेषां गुणोमतः । संयोगश्च विभागश्च संख्यादित्वादिकास्तथा ॥ ८९ ॥ द्विपृथक्त्वादयस्तद्वदेतेनैकाश्रितागुणाः । अतः शेषागुणाः सर्व्वे मताएकैकवृत्तयः ॥ ९० ॥ बुद्ध्यादिषट्कंस्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः । अदृष्टभावनाशब्दाअमीवैशेषिकागुणाः ॥ ९१ ॥ संख्यादिरपरत्वान्तोद्रवःसांसिद्धिकस्तथा । गुरुत्ववेगौ सामान्यगुणाएते प्रकीर्त्तिताः ॥ ९२ ॥ संख्यादिरपरत्वान्तोद्रवत्वं स्नेहएव च । एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ॥ ९३ ॥ वाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावनाः । अतीन्द्रियाविभू

भान्तु ये खुर्वैशेषिकागुणाः॥९४॥ अकारणगुणेत्वा
ख्याते तु परिकीर्त्तिताः। अपाकजास्तु स्पर्शान्ता
वत्वञ्च तथाविधं ॥ ९५ ॥ स्नेहवेगगुरुत्वैकपृथक्त्व
परिमाणकं। स्थितिस्थापकदृत्येते स्युः कारणगुणाख्
याः॥९६॥ संयोगश्च विभागश्च वेगश्चैते तु कर्म्मजाः।
स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके॥९७॥ भवेद्
समवायित्वमथ वैशेषिके गुणे। आत्मनः स्यान्निमि
त्तत्वमुष्णस्पर्शगुरुत्वयोः॥ ९८॥ वेगेऽपि च द्रवत्वे
च संयोगादिद्वये तथा। परापरत्वधित्वादिपृथक्त्वा
दिके पुनः॥९९॥ द्वित्वैव कारणत्वं स्यादथ प्रादेशि
कोभवेत्। वैशेषिकोविभुगुणः संयोगादिद्वयं तथा
॥१००॥ चक्षुर्ग्राह्यं भवेद्रूपं द्रव्यादेरुपलम्भकं। चक्षुषः
सहकारि स्यात् प्रकाशादिकमनेकधा॥१०१॥ जला
दिपरमाणौ तन्नित्यमन्यत्तद्धेतुकं। रसस्तु रसना
ग्राह्योमधुरादिरनेकधा॥१०२॥ सहकारी रसस्या
या नित्यतादि च पूर्ववत्। घ्राणग्राह्योभवेद्गन्धो
घ्राणस्यैवोपकारकः॥१०३॥ सौरभश्चासौरभश्च स द्वै
धा परिकीर्त्तितः। स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्या
दुपकारकः ॥१०४॥ अनुष्णाशीतशीतोष्णभेदात्स
त्रिविधोमतः। कार्श्यादिः क्षितावेव नित्यतादि

च पूर्ववत् ॥१०५॥ एतेषां पाकजत्वन्तु क्वचिन्नाप्यथ क्वचित् । नचापि परमाणौ स्यात्पाकोवैशेषिके नये ॥१०६॥ नैयायिकानान्तु मते द्व्यणुकादावपीष्यते । गणनव्यवहारे तु हेतुः संख्याभिधीयते ॥ १०७ ॥ नित्येषु नित्यमेकत्वमनित्ये नित्यमिष्यते । द्वित्वादयः पराद्धान्ता अपेक्षाबुद्धिजा मताः ॥१०८॥ अनेकाश्रयपर्य्याप्ताएते तु परिकीर्त्तिताः। अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः॥१०९॥ अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरुच्यते । परिमाणं भवेन्मानव्यवहारस्य कारणं ॥११०॥ अणु दीर्घं महद्ह्रस्वमिति तद्भेदईरितः । अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतं ॥१११॥ संख्यातः परिमाणाच्च प्रचयादपि जायते । अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतं॥११२॥परिमाणं घटादौ तु परिमाणजमुच्यते । प्रचयः शिथिलाख्योयः संयोगस्तेन जन्यते ॥११३॥ परिमाणं तूलकादौ नाशस्तस्याश्रयनाशतः । संख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणं ॥११४॥ अन्योन्याभावतोनास्य चरितार्थत्वमुच्यते । अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥११५॥ अप्राप्तयोस्तु या प्राप्तिः सैव संयो

गईरितः। कीर्त्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्म्म
जः॥११६॥ तयोभयक्रियाजन्योभवेत्संयोगजोऽप
रः। आदिमः ध्येनश्चैलादिसंयोगः परिकीर्त्तितः
॥११७॥मेषयोः सन्निपातोयः सद्वितीयउदाहृतः।
कपालतरुसंयोगात्संयोगस्तरुकुम्भयोः॥ ११८॥
तृतीयः स्यात्कर्म्मजोऽपि द्विधैव परिकीर्त्तितः। अभि
घातोनोदनञ्च शब्दहेतुरिहादिमः॥११९॥ श
ब्दाहेतुर्द्वितीयः स्यादिभागोऽपि द्विधा भवेत्। एक
कर्म्माऽनवस्त्वाद्योद्वयकर्म्माऽनवोऽपरः॥१२०॥ विभा
गजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत्। हेतुमा
त्रविभागोत्थोहेत्वहेतुविभागजः॥१२१॥ परत्व
ञ्चापरत्वञ्च द्विविधं परिकीर्त्तितं। दैशिकं कालिक
ञ्चापि मूर्त्तएव तु दैशिकं॥१२२॥ परत्वं सूर्य्यसंयो
गभूयस्त्वज्ञानतोभवेत्। अपरत्वं तदल्पत्वबुद्धितः
स्यादितीरितं॥१२३॥ तयोरसमवायी तु दिक्सं
योगस्तदाश्रये। दिवाकरपरिस्पन्दपूर्व्वोत्पन्नत्वबुद्धि
तः॥१२४॥परत्वमपरत्वन्तु तदनन्तरबुद्धितः। अच
लत्वसमवायी स्यात्संयोगः कालपिण्डयोः॥१२५॥
अपेक्षाबुद्धिनाशेन नाशस्त्वेषामुदाहृतः।बुद्धिःप्रका
रः प्रागेव प्राय शोऽपि निरूपितः॥१२६॥ अथाव

शिष्टोऽपरः प्रकारः परिदृश्यते। अप्रमा च प्रमा चेति ज्ञानं द्विविधमुच्यते ॥ १२७ ॥ तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता। तत्प्रयोजकोविपर्यासः संशयोऽपि प्रकीर्त्तितः ॥ १२८ ॥ आद्योद्वे यात्मबुद्धिः शङ्खादौ पीततामतिः। भवेन्निश्चयरूपा या संशयोऽथ प्रदर्श्यते ॥ १२९ ॥ किंस्विन्नरोवा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः। तदभावाप्रकाराधीस्तत्प्रकारा तु निश्चयः ॥ १३० ॥ ससंशयोमतिर्या स्यादेकत्राभावभावयोः। साधारणादिधर्म्मस्य ज्ञानं संशयकारणं ॥ १३१ ॥ दोषोऽप्रमायाजनकः प्रमायास्तु गुणोभवेत्। पित्तदूरत्वादिरूपोदोषोनानाविधः स्मृतः ॥ १३२ ॥ प्रत्यक्षे तुविशेष्येण विशेषणवर्मा समं। सन्निकर्षोगुणस्तु स्यादथ त्वनुमितौ गुणः ॥ १३३ ॥ पक्षेसाध्यविशिष्टे च परामर्शोगुणोभवेत्। शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥ १३४ ॥ शाब्दबोधे योग्यतायास्तात्पर्य्यस्याथवा प्रमा। गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा ॥ १३५ ॥ अथवा तत्प्रकारं यज्ज्ञानं तद्विशेष्यकं। तत्प्रमा न प्रमा नापि भ्रमः स्यान्निर्विकल्पकं ॥ १३६ ॥ प्रकारतादिशून्यं चि सम्बन्धानवगाहि तत्। प्रमात्वं न ततो

Digitized by Google

यार्द्धं संशयानुपपत्तितः ॥ १३७ ॥ व्यभिचारस्या प्रबोऽपि सदाचारग्रहस्तथा । हेतुर्व्याप्तिग्रहे तर्कः क्वचित् ग्रहानिवर्त्तकः ॥ १३८ ॥ साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा। सउपाधिर्भवेत्तस्य निरू पोऽयं प्रदर्श्यते ॥ १३९ ॥ सर्वे साध्यसमानाधिकर णाः सदुपाधयः। हेतोरेकाश्रये येषां स्वसाध्यव्यभि चारिता ॥ १४० ॥ व्यभिचारस्यानुमानमुपाधेस्तु प्र योजनं। शब्दोपमानयोर्नैं व पृथक्प्रामाण्यमिष्यते ॥ १४१ ॥ अनुमानगतार्थत्वादिति वैशेषिकं मतं। तन्न सम्यग्विना व्याप्तिबोधं शाब्दादिबोधतः ॥ १४२ ॥ द्वैविध्यन्तु भवेद्व्याप्तेरन्वयव्यतिरेकतः। अन्वयव्याप्ति रुक्तैव व्यतिरेकादथोच्यते ॥ १४३ ॥ साध्याभावव्या पकत्वं हेत्वभावस्य यन्नवेत्। अर्थापत्तेस्तु नैवेद प्र माणान्तरतेष्यते ॥ १४४ ॥ व्यतिरेकव्याप्तिबुद्धा च रितार्थादि सायतः। सुखन्तु जगतामेव काम्यं धर्मे ण जन्यते ॥ १४५ ॥ अधर्मजन्यं दुःखं सर्वप्रतिकूलं सचेतसां । निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते ॥ १४६ ॥ इच्छा तु तदुपाये स्यादिष्टोपायत्व धीर्यदि । चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा च या भवेत् ॥ १४७ ॥ तद्धेतुः कृतिसाध्येष्टसाधनत्वमति

भवेत् । यत्रवद्दिष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका ॥१४८॥ तद्धेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते । दिष्ट साधनताबुद्धिर्भवेद्वेषस्य कारणं । प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणं ॥१४९॥ एवं प्रयत्नवैविध्यं तार्किकैः परिदर्शितं । चिकीर्षाकृतिसाध्येष्ट साधनत्वमतिस्तया ॥१५०॥ उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत् । निवृत्तिस्तु भवेद्वेषाद्दिष्टसाध नता धियः ॥१५१॥ यत्नोजीवनयोनिस्तु सर्व्वदा नीन्द्रियोभवेत् । शरीरे प्राणसञ्चारे कारणं परिकी र्त्तितं ॥१५२॥ अतीन्द्रियं गुरुत्वं स्यत्पृथिव्यादित्रये तु तत् । अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृत ॥१५३॥ तद्देवासमवायि स्यात्पतनाख्ये तु कर्म्मणि । सांसिद्धिकद्रवत्वं स्यान्नैमित्तिकमथापरं ॥१५४॥ सांसिद्धिकन्तु सलिले द्वितीयं क्षितितेजसोः । सरसौ जले नित्यमन्यत्रानित्यमुच्यते ॥१५५॥ नैमि त्तिकं घस्रिग्योगात्तपनीयघृतादिषु । द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् ॥१५६॥ स्नेहोजले सनि त्योऽप्यनित्योऽवयविन्यसौ । तैलान्तरे सत्प्रकर्षा दहनस्यानुकूलता ॥१५७॥ संस्कारभेदोवेगोऽय स्थितिस्थापकभावने । मूर्त्तमात्रे तु वेगः स्यात्कर्म्म

जीवेगजः क्वचित् ॥१५८॥ स्थितिस्थापकसंस्का
रः क्षितौ केचिच्चतुर्ष्वपि। अतीन्द्रियः सविज्ञेयः क्व
चित्स्यन्देऽपि कारणं॥१५९॥भावनाख्यस्तु संस्का
रोजीववृत्तिरतीन्द्रियः। उपेक्षानात्मकस्यास्य निश्च
यः कारणं भवेत् ॥१६०॥ स्मरणे प्रत्यभिज्ञायाम
प्यसौ हेतुरुच्यते । धर्म्माधर्म्मावदृष्टं स्याद्धर्म्मः स्व
र्गादिसाधनं ॥१६१॥ गङ्गास्नानादियागादिव्या
पारः परिकीर्त्तितः। कर्म्मनाम्नाजलस्पर्शादिना ना
प्यस्त्वसौ मतः॥१६२॥ अधर्म्मोनरकादीनां हेतु
र्निन्दितकर्म्मजः। प्रायश्चित्तादिनाप्योऽसौ जीवव
त्तौ त्विमौ गुणौ ॥१६३॥ इमौ तु वासनाजन्यौ
ज्ञानादपि विनश्यतः। शब्दोध्वनिश्च वर्णश्च स्फ
ोटादिर्ध्वनिः ॥१६४॥ कण्ठसंयोगादिजन्याव
र्णास्ते कादयोमताः। सर्व्वः शब्दोनभोवृत्तिः श्रोत्रो
त्पन्नस्तु गृह्यते॥१६५॥ वीचीतरङ्गन्यायेन तदुत्प
त्तिस्तु कीर्त्तिता। कदम्बकोरकन्यायादुत्पत्तिः कस्य
चिन्मते॥१६६॥ उत्पन्नः कोविनष्टः कइति बुद्धेर
नित्यता। सोऽयं कइति बुद्धिस्तु साजात्यमवलम्बते
॥१६७॥ तदेवौषधमित्यादौ सजातीयेऽपि दर्श
नात् ॥ इति भाषापरिच्छेदः समाप्तः॥

Digitized by Google

सिद्धान्तमुक्तावली।

नमोगणेशाय।

पूजासक्तीकृतविधुर्वक्त्रीकृतवाक्सिद्धिः। भवोभवतु भव्या य लीलाताण्डवपण्डितः॥ निजनिर्मितकारिकावलीमतिपंक्ति मचिरन्तनेक्षिभिः। विषदीकरवाणि कौतुकाजनु राजीव दृशार्कजन्मदः॥ सद्व्या गुणगुम्फिता सुकृतिनां सत्कर्णयोः शा पिका यस्मान्नविवेचनित्थमिलिता भावप्रकर्षोज्ज्वला। वि शेषार्थवति विचक्षणयतिना सिद्धान्तमुक्तावली विन्यस्ता मम मोमुहं जितमुनां मधुसिरेवा चिरं॥

विद्यानिधानाख्यं मङ्गलं शिष्यशिक्षायै निबध्नाति मूलके त्यादि। नमेत्यादि। नमेत्यादि। विघ्नध्वंसं प्रति च या कामना प्रति सहकं विनापि मङ्गलं नास्तिकादीनां मते सिद्धिमारिप्सानिवर्तका हिति तेन नास्तिकसिद्धान्तस्थितानेव मङ्गलस्य फलमते सिद्धे तत्र च फलसिद्धावावश्यकायां यस्मादिति हेतुफलभावे हेतुफल मवधारणाद्यन्यव्यवच्छात् उपस्थितत्वाच्च यस्मादेव हि फलं कल्पते। हेतुत्वञ्च यत्र मङ्गलं क्रियते तत्रापि व्यवधानरीत्या कारणत्वमते यत्र च यद्यपि मङ्गले यस्मादेव क्रियते तत्र तत्र वस्तुरेवविशेषितमाकाङ्क्षा वा शेषं प्रत्युद्देश्यतया यद्यत्तत्र

विघ्ननिराकरणकारणत्वं विघ्नध्वंसस्य मङ्गलस्य द्वारमित्याहुः मथास्तु मङ्गलस्य विघ्नध्वंसएव फलं समाप्तिस्तु बुद्धिपूर्वप्रवृत्त्यादिकारणकलापात् न च ततः विघ्नविघ्नविरहवता ततो मङ्गलस्य निष्फलतापत्तिरिति वाच्यं दृष्टापत्तेः विघ्नाभावस्य तदाचरणात् तथैव शिष्टाचरणात् न च ततस्य निष्फलत्वे तदोधकशिष्टाचारानुमितवेदप्रामाण्यापत्तिरिति वाच्यं यतिविघ्ने तन्नाशस्यैव वेदबोधितत्वात् अतएव पापध्वंसेव कृतप्रायश्चित्तस्य निष्फलत्वेऽपि न तदोधकवेदप्रामाण्यं मङ्गलन्तु विघ्नध्वंसविघ्नेषे कारणं विघ्नध्वंसविघ्नेषे च विनायकस्तवपाठादिः। क्वचिच्च विघ्नाद्यनाभावएव समाप्तिसाधनं प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात् दृष्टत्वञ्च नास्तिकादिकृतग्रन्थेषु अन्यान्तरीयमङ्गलजन्यदुरितध्वंसः स्वतः विघ्नविघ्नाद्यनाभावो वास्तीति न व्यभिचारदृष्टाहुः। संसारेति संसारएव मही रुहोदृष्टस्तस्य बीजाय एतेन दूरेऽपि प्रमाजनकत्वं दर्शितं भवति तथादि घटादिप्रागभावं प्रति दण्डत्वं तथा विलम्बादिकमपि न च तत्कपालसमवायादीनां सत्त्वात्तत्कपालेश्वरविघ्नैः न च प्रतिबन्धस्यैव कार्यजन्यत्वसाधकेन तत्प्रतिपक्षरूपेति वाच्यं अप्रयोजकत्वात् मम तु कार्यत्वेन कार्यत्वस्य भावएव अनुकूलतर्कः द्यावाभूमी जनयत्येवैकमाद्यं विश्वस्य कर्मा भुवनस्य गोप्ता इत्यादेरयमागमाभ्यनुसन्धेयाः॥

पदार्थानामुद्देशमाह। द्रव्यंगुणादित्यादि। यत्समवायाभावसंबन्धेनादेयं यद्भावत्वं प्राप्तं तेन भावत्वेन द्रव्यगुणत्वा

योग इति। एते च पदार्थाः वैशेषिकप्रसिद्धानेवाधिकृत्योक्ताः अन्यथा
बुद्धेः प्रतियोगिनश्चैवमेव भावे अतएव उपमानविभागस्तु
सप्तपदार्थनिगदेन अभिधाद्यर्थोपलब्धिरूपपदार्थत्वमाश्रित्य
॥ ननु कथमेतावत एव पदार्थाः अभिधाद्याद्यनुमानमपि रूपं
दार्थोऽस्त्यर्थादि भवादिभवदिभेन वक्ष्यिवा दाहेन जन्यते
भवद्भूतेन तु जन्यते तच भवादिभ वक्ष्यो दाहानुकूला अग्नि
र्गोवाहो उपनीयतेऽनेन वाक्यप्रयोगेण च अन्यमदति वर्णयते
एवं षाड्गुण्यमपीति रूपपदार्थः तद्धि न षट्पदार्थेष्वन्तर्भवति
वाक्यान्येऽपि यस्मात् यथा गौरयं पिण्डं तथा अश्वोऽयमपीति षाड्
ण्यप्रतीतेः नाप्यभावः सत्येन प्रतीयमानत्वादिति चेन्न भवाधे
नावधिमद्वस्त्वादेरेवादिर्थं मति ज्ञानस्यैव भवाभावाद्रेव
वा हेतुमत्त्वेनेन व्यभिचारे सत्यन्यत्रेति व्यर्थं अभिमतार्थसाधनाय
नोपयोगात् नचैवमेवेति नियमेऽपि सत्यं दाहदति वाक्यं उपनीयमानाभावविशिष्टमधिकोपमानाभावस
येहत्वात् षाड्गुण्यमपि न पदार्थान्तरं किन्तु तद्विशिष्टे सति
तद्व्यवहारोपयोगित्वं यथा चक्षुर्विशिष्टे सति चक्षुरनाद्यदृष्ट
त्वादिमत्वं सुखे चक्षुराद्यक्षमिति ॥

द्रव्यादि विभजते। क्रियावति इतीति तच द्रव्यादि द्रव्य
ं तच्च द्रव्यमजानतो क्रियार्थं न हि तच्च प्रत्यक्षं प्रमाणं भूततेजः
सपृक्तिषु द्रव्यमयमादिति चेन्न कार्यद्रव्यमात्रविचारस्यत
च्छरीरादिमत्वं घटीजलस्य विभागस्य वा समवायिकारणत्वाय
च्छरीरादेर्वा तद्विशिष्टेरिति नन्वयं द्रव्यमयः तुलोगोलं

तद्धि प्रत्यक्षेण गृह्यते तच्च रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यं तच्च गन्धशून्यत्वात् न पृथिवी नीलरूपवत्त्वाच्च न जलादिकं तत्प्रत्यक्षे बाह्येन्द्रियविषयं चक्षुः कारणं इति चेन्न आलोकसंयोगाऽभावेनोपपत्तौ दृष्टान्तस्य कर्मवत्त्वसाधनाऽसाधकत्वात् रूपवत्त्वप्रयोजिकायां कर्मवत्त्वप्रयोजिकायामपि आलोकापहारेणोपाधिकी भ्रान्तिरेव तमसोऽलिखितत्वे ऽनुमानवधाद्दिक्कालयोर्नागैरवञ्च स्यात् स्वर्गस्य यथा तेजस्त्वसंभवस्तथा वक्ष्यते॥

गुणान् विभजते॥ अथ गुणादिति। एते गुणाश्चतुर्विंशतिसंख्यकाः यथादेव कणभक्षतन्त्रग्रन्थेन च स्फुटिताः। तेषु गुणानां दिक्कालविशिष्टिरचे वक्ष्यते॥

कर्माणि विभजते॥ उत्क्षेपणमिति कर्मलक्षणानि तु ग्रन्थेषु सिद्धा एवमुत्क्षेपणत्वादिकमपि तत्तत्क्रमणादिकमपि पक्षे कर्माधिक्यतया कुतोनीलकमलमाह भ्रमरवदित्यादि॥

सामान्यं निरूपयति। सामान्यमिति तल्लक्षणन्तु नित्यत्वे सत्यनेकसमवेतत्वं अनेकसमवेतत्वं संयोगादीनामव्याप्यवृत्तत्वं नित्यत्वे सतीति नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामव्याप्यवृत्तित्वं अनेकेति नित्यत्वे सत्यनेकवृत्तित्वमात्यन्ताभावेऽपि व्याप्यवृत्तित्वसामान्यं विहाय समवेतत्वमित्युक्तं एकमात्रवृत्तिषु न अतिः तथाचोक्तं व्यक्तेरभेदस्तुल्यत्वं संकरो नानवस्थितिः। रूपहानिरसम्बन्धोऽतिव्याधर्यसंग्रहः। एक व्यक्तिसमवेतत्वान्नाकाशत्वं न अतिः तुल्यव्यक्तिकत्वात् षट्त्वं काल त्वं न अतिरद्रव्यं षड्गुणत्वात् भूतत्वं मूर्त्तत्वं न अतिः अद्रव्य

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

देशसम्बन्धविशिष्टः न च समवायस्वीकर्त्रे शक्तौ इच्छाबुद्धि प्रयत्नः नच स्वसमवायसम्बन्धेऽपि इच्छाभावात् न चैवं घटसम्बन्ध वैशिष्ट्यं समन्वाकारं विधेदिति वाच्यं तच्च निष्फले मूलसि घटा यवयवसम्बन्धरूपेऽपि घटाभावबुद्धिप्रसङ्गात् घटाभावसम्बन्ध मच घटात् तच्च निष्फलात् सम्बन्धेऽपि तत्प्रतीतिर्न स्यात् वैशिष्ट्यस्य च तच्च घटात् मम तु मते घटे वाकारनाशाद् द्रव्यं द्रव्यरूपस्य नष्टत्वात तदभावबुद्धिः वैशिष्ट्यस्यानित्यत्वे समवायवैशिष्ट्यकल्पने तवैव गौरवं इत्यच्च तत्तत्कालीनतत्त मूलसादिकं तत्तदभावानां घटसम्बन्धः॥

अभावं विभजते। अभावस्त्रिविध इत्यादिषट्का नोन्याभावत्वं संसर्गेति संसर्गाभावान्योन्याभावभेदादित्यर्थः अन्योन्याभावस्यैकविधत्वात्तद्विभागानापात्। संसर्गाभावं वि भजते। प्रागभावइति संसर्गाभावत्वं अन्योन्याभावभिन्नाभावत्वं अन्योन्याभावत्वं तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वं विनाश्याभावत्वं प्रागभावत्वं अन्याभावत्वं ध्वंसत्वं नित्यसंसर्गा भावत्वं अत्यन्ताभावत्वं च तु भूतलादौ घटादिकमप शङ्क्यं पुनरानीतञ्च तच्च घटकालस्य समवायघटकतया अत्यन्ताभावस्य नित्यत्वेऽपि घटादौ न घटात्यन्ताभावबुद्धिः तच्च उत्पादविनाशप्रतीतौ घटध्वंसोऽयमभावइति केचित् अच ध्वंसप्रागभावयोरधिकरणे नात्यन्ताभावइति प्राचीनमतं ग्रामघटे रूपोनास्तीति रूपघटे ग्रामोनास्तीति चोक्त प्रागभा वध्वंसव्यवहारेण न तु तदत्यन्ताभावं प्रमाणं तच विरोधि

Digitized by Google

नाभावात् भंशादिवाक्यावच्छेदेनैकार्थत्वज्ञानाभावेऽवर्त्तनदर्शनाच्च। यत्वसुभावाद्यात्मकाधिकरणात्मकं साधर्म्यादिति चेन्न यत्वसामान्याधिकरणात्मकलक्षणमपेक्षातिरिक्तलक्षणमाश्रय सभीवत्वात् एवञ्च आधाराधेयभावोऽनुपपन्नते एवञ्च तत्तच्छब्दमात्रस्वरूपाभावानां प्रत्यक्षत्वमुपपद्यते यत्र वा तत्तदधिकरणानां तत्तद्विशिष्टाभावग्राहकत्वाद्प्रत्यक्षत्वं स्यात् इतेन ज्ञानविशेषकालविशेषात्मकलक्षणाभावेऽपि प्रत्यक्षत्वोपपत्तेः॥

इदानीं पदार्थानां साधर्म्यं वैधर्म्यञ्च वक्तुं प्रक्रमते समानीत्यादि। समानोधर्मोयेषां ते सधर्माणः तेषां भावः सा धर्म्यं समानोधर्मइति फलितार्थः एवं विरुद्धोधर्मोयेषां ते विधर्माणः तेषां भावः वैधर्म्यं विरुद्धोधर्मइति फलितार्थः केवलं ज्ञानविषयता सा च सर्व्वैवास्ति ईश्वरादिज्ञानविषयताश्रयः केवलान्वयित्वात् इदं अभिधेयत्वप्रमेयत्वादिकं नेत्यर्थः। द्रव्येति द्रव्यगुणकर्म्मसामान्यविशेषाणां साधर्म्यमनेकत्वं समवायित्वञ्च यद्यप्यनेकत्वं अभावेऽपि तथाप्यनेकत्वे सति भवत्वं यद्धर्म्मं साधर्म्यं तथाच अनेकभाववृत्तिपदार्थवि भाजकोपाधित्वं फलितार्थः तेन षण्णां प्रत्येकं नाव्याप्तिः समवायित्वं समवायसम्बन्धेन सम्बन्धित्वं न तु समवायत्वं वा नाव्याप्तेरभावात् तथाच सप्तवेतरपदार्थविभाजकोपा धित्वं फलितार्थः तेन नित्यद्रव्येषु नाव्याप्तिः सत्तावन्तइति द्रव्यगुणकर्म्मणां सत्तासम्बन्धित्वार्थः। गुणादिरिति यद्यपि गुण

क्रियाशून्यत्वमात्रस्थले घटादावतिव्याप्तं क्रियाशून्यत्वस्य गगनादावतिव्याप्तं तथापि गुणवदवृत्तिधर्मत्वं कर्मवदवृत्ति पदार्थविभाजकोपाधिमत्वं तदर्थः नहि घटत्वादिकं द्रव्यत्वं वा गुणवदवृत्ति कर्मवदवृत्ति वा किन्तु गुणत्वादिकं तथा आकाशत्वादिकन्तु न पदार्थविभाजकोपाधिः अतो गुणवृत्ति वे सति कर्मवृत्तित्वे सति वा सत्ताव्याप्यजातिशून्यत्वमात्रं विवक्षितं गुणकर्मसंकीर्व्याप्तिवारणाय गुणवदवृत्तिकर्मवदवृत्तीति न पुनरुक्तवैयाव्याप्तिवारणाय सत्ताव्याप्येति व्याप्तिश्च भेदाग्रहेण निवेशिता इत्यतोऽत्र दोषः द्रव्यगुणान्यतरत्वमादाय तथैवा व्याप्तिवारणाय जातीति अभावेऽतिव्याप्तिवारणाय भावपदमिति गुणवदवृत्तिः सत्ताव्याप्यजातिर्भिन्नं तच्छून्यत्वं पर्यवसन्नं स्यात् ॥

सामान्येति। सामान्यानधिकरणत्वं सामान्याधीनमित्यर्थः पारिमाण्डल्येति पारिमाण्डल्यं अणुपरिमाणं कारणं तद्विज्ञानामित्यर्थः अणुपरिमाणं न तु कस्यापि कारणं तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् तच्च न सम्भवति परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् महद्दीर्घस्य महत्तरत्ववत् अणुजन्यस्याणुतरत्वप्रसङ्गात् एवं परममहत्परिमाणं प्रतीन्द्रियसामान्यं विशेषाश्रितेति बोध्यं दूरमपि यौगिकप्रत्यक्षे विषयस्य न कारणत्वं भाव्यमानसामान्यं न प्रत्यासत्तिः भाव्यमानं किञ्चिन्मानुमितिकारणं इत्यनिष्टापत्तेश्च मानसप्रत्यक्षे आत्मसंयुक्तस्य कारणत्वात् महत्परिमाणं

Digitized by Google

कारणादेवार्थं तस्यापि न कारणत्वमित्याचार्याणामाशय इत्यन्ये तस्य ज्ञानातिरिक्तं प्रति कारणतायाएव आचार्यैरुक्तत्वात्। ननु कारणत्वं किमत आह अन्यथेति तच्च कारणत्वञ्च तत्र समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः अत्र यद्यपि तुरीतन्तुसंयोगानां पटासमवायिकारणत्वं स्यात् एवं वेगादीनामपि अभिघाताद्यसमवायिकारणत्वं स्यात् एवं ज्ञानादिकमिच्छाद्यसमवायिकारणं स्यात् तथापि पटासमवायिकारणत्वलक्षणे तुरीतन्तुसंयोगनिष्ठत्वं देयं तुरीतन्तुसंयोगस्य तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव एवं वेगादिकं वेगस्याभिघाताद्यसमवायिकारणं भवत्येवेति तत्तत्कार्यासमवायिकारणत्वलक्षणे तत्तद्विभिन्नत्वं न देयं आत्मविशेषगुणानान्तु कुत्राप्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव अत्र समवायिकारणप्रत्यासन्नं द्विविधं कार्यैकार्थप्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं तच्च कार्येण घटेन सह कारणस्य कपालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणं तच्च घटरूपं प्रति कारणं घटः तेन सह कपालरूपस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति तथाच कश्चित्समवायसम्बन्धेन कश्चित्तत्समवायिसमवायसम्बन्धेनेति फलितार्थः इत्यत्र कार्ये कार्यकारणैकार्थान्यतरप्रत्या

सत्या कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्य लक्षणं पर्य्यवसन्नं आभ्यां समवायिकारणासमवायिकारणाभ्यां भिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः॥

इदानीमन्यथासिद्धत्वमेव कियतां पदार्थानां तदाह येन इत्यादिना यत्कार्य्यं प्रति कारणस्य पूर्व्ववर्त्तिता येन रूपेण गृह्यते तत्कार्य्यं प्रति तद्रूपमन्यथासिद्धमिति भावः यथा घटं प्रति दण्डत्वमिति। द्वितीयमन्यथासिद्धमाह कारणमिति यस्य स्वातन्त्र्येणान्वयव्यतिरेकौ नास्तः किन्तु स्वकारणमादायैव अन्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धं यथा दण्डरूपं तृतीयमाह अन्यं प्रतीति अन्यं प्रति पूर्व्ववर्त्तित्वं गृहीतैव यस्य यत् कार्य्यं प्रति पूर्व्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यं प्रत्यन्यथासिद्धत्वं यथा घटादिकं प्रत्याकाशस्य आकाशस्य हि घटादिकं प्रति आकाशत्वेन कारणत्वं स्यात् आकाशत्वं शब्दसमवायिकारणत्वं अतः शब्दं प्रति जनकत्वं गृहीतैव घटादिकं प्रति जनकत्वं यावन्मतस्तदन्यथासिद्धं शब्दाश्रयत्वेन कारणत्वे कान्यथासिद्धिरिति चेत् पञ्चमीति गृहाण अथाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत् कवलादिकं विशेषपदार्थो वेति। चतुर्थमन्यथासिद्धमाह जनकं प्रतीति यत्कार्य्यजनकं प्रति पूर्व्ववर्त्तित्वं गृहीतैव यस्य यत्कार्य्यं प्रति पूर्व्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यं प्रत्यन्यथासिद्धत्वं यथा कुलालपितुर्घटं प्रति तस्य कुलालपितृत्वेन घटं प्रति जनकत्वेऽन्यथासिद्धिः कुलालत्वेन जनकत्वे निष्टापत्तिः कुलालमात्रस्य घटं प्रति जनक

त्वात्। पञ्चममन्यथासिद्धिमाह अतिरिक्तमिति नियतावश्यक पूर्ववर्तिनः अवश्यकृन्नियतपूर्ववर्त्तिनएव कार्य्यसम्भवे त न्निरूपकत्वमन्यथासिद्धमित्यर्थः अतएव प्रत्यक्षे महत्त्वं कारणम नेकद्रव्यवत्त्वमन्यथासिद्धं न च वैपरीत्ये किं विनिगमकं इति वाच्यं महत्त्वजातेः कारणतावच्छेदकत्वे लाघवात्। रासभा दिरिति यद्घटत्वस्य प्रति रासभत्व नियतपूर्ववर्त्तित्वमस्ति नचापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव सङ्गतेरपि सम्भवे रासभोऽन्यथासिद्ध इति भावः। एते ष्विति एतेषु पञ्चस्वन्यथासिद्धेषु मध्ये पञ्चमोऽन्यथासिद्ध आवश्यकः तेनैव परेषां चरितार्थत्वात् तथा हि दण्डा दिभिरवश्यकृन्नियतपूर्ववर्त्तिभिरेव कार्य्यसम्भवे दण्डत्वादिक मन्यथासिद्धं न च वैपरीत्ये किं विनिगमकं इति वाच्यं दण्ड त्वस्य कारणत्वे दण्डघटितपरम्पराया: सम्भवत्कल्पने गौरवात् एवमन्येषामपनेय चरितार्थत्वसम्भवात्।

गुणकर्मेति असमवायिकारणत्वं गुणकर्माभिन्नानां वैधर्म्यं नतु गुणकर्मणोः साधर्म्यं इत्यपि तात्पर्यं अथवा असमवा यिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः तेन ज्ञानादौ नामपि असमवायिकारणविरहेऽपि न क्षतिः।

अन्यत्रेति नित्यद्रव्याणि परमाण्वाकाशादीनि विहायास्ति तत्वं साधर्म्यमित्यर्थः आश्रितत्वन्तु समवायादिसम्बन्धेन वृत्ति मत्वं विवक्षितं तथा नित्यानामपि कालादौ वृत्तेः कालिक स

मन्यान्यसम्बन्धेन तेषामवृत्तित्वमिति परमार्थः तेन समवा येनावृत्तावपि न क्षतिः ॥

इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते। क्षित्यादी नामिति क्षितिर्जलमिति पृथिव्यप्तेजोवायुमनसां परत्वापरत्व क्रियं मूर्त्तत्वं क्रियावत्त्वं वेगवत्त्वञ्च साधर्म्यं न च यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यं परत्वादि समानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वञ्च विवक्षितत्वात् मूर्त्तत्वं त्रसरेणुपरिमाणवत्त्वं तच्च तेषामेव गगनादिपरिमाणञ्च तु तोऽप्यसरेणुत्वाभावात् पूर्ववत् कर्मवत्त्वं कर्मसमानाधिकरण द्रव्यत्वव्याप्यजातिमत्त्वं वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वञ्च बोध्यं।

कालेति। कालाकाशात्मदिशां सर्व्वगतत्वं सर्व्वमूर्त्त संयोगित्वं परममहत्त्वञ्च परममहत्त्वं जातिविशेषः त्रस रेणोरणुपरिमाणत्वं वा। क्षित्यादीति पृथिव्यप्तेजोवाय्वा त्मानां भूतत्वं तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वं त्रस रेणुत्वं लौकिकप्रत्यक्षयोग्यत्वं बोध्यं तेन ज्ञातोऽहट त्यादिप्रत्यक्षे ज्ञानस्याप्युपगीतभानविषयत्वात् तदति व्याप्तिः ज्ञानं वा प्रत्यक्षादिविषयरूपादिमति परमाण्वादाव व्याप्तिः तत्रापि स्वरूपयोग्यत्वात् अहत्वखत्वकारणान्तरा सन्निधानाच्च न प्रत्यक्षं अथवा आत्मावृत्तिविशेषगुणवत्त्वं तत्त्वं। चतुरीति पृथिव्यप्तेजोवायूनां सर्व्ववत्त्वं द्रव्यारम्भकत्वं इति पृथिव्य प्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वं न च द्रव्यारम्भके घटा दावव्याप्तिः द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वञ्च

विवक्षितत्वात्। आकाशशरीरित्वमिति आकाशात्मत्वाभावा
यवृत्तित्वाधिकविशेषगुणवत्त्वं आकाशस्य विशेषगुणः शब्दः स
चाव्याप्यवृत्तिर्यदा किञ्चिदवच्छेदेन शब्दवत्त्वयते तदभावच्छे
देन तदभावस्यापि वक्तव्यात् क्षणिकत्वञ्च तृतीयक्षणवृत्तित्वंच
प्रतियोगित्वं। योगजविभुविशेषगुणादीनां खेश्वरवर्त्तिगुण
नाश्यत्वात् प्रथमशब्देन नाशः एवं ज्ञानादीना
मपि ज्ञानादिकं हि आत्मनि विभौ शरीरावच्छेदेनोत्पद्यते
घटाद्यवच्छेदेव तदभावोऽस्त्येव। एवं ज्ञानादिकमपि चतु
र्दशावस्थायि तत्यज्ञाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेष
गुणवत्त्वञ्चार्थः पृथिव्यादौ रूपादिर्विशेषगुणोऽस्तीति अतोऽव्या
प्यवृत्तिरित्युक्तं पृथिव्यादावव्याप्यवृत्तिर्यदोगादिरस्तीति अतो
विशेषगुणत्वमुक्तं न च रूपादीनामपि कदाचित् तृतीय
क्षणे नाशदर्शनात् क्षणिकविशेषगुणवत्त्वं क्षितावतिव्याप्तमि
ति वाच्यं चतुर्थक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य
विवक्षितत्वात् अपेक्षाबुद्धिः द्वयत्वं तिष्ठति द्वयचतुष्टयन्तु
किमपि ज्ञानादिकं न तिष्ठति रूपत्वादिकन्तु द्वयचतुष्टय
स्थायिन्यपि रूपादौ वर्त्तत इति व्युदासः। ईश्वरज्ञानस्य
चतुःक्षणवृत्तित्वात् जन्येत्युक्तं आकाशजीवात्मनोः साधर्म्यं
तदा अन्येति न देयं देवत्वादिकमादाय लक्षणसमन्वयात्
परममहत्त्वस्य तादृशगुणत्वाच्च चतुर्थक्षणे द्वित्वादीनामपि
नाशाभ्युपगमात् द्वित्वादीनामपि तथात्वात् तदारभ्याय
विशेषेति त्रिक्षणवृत्तित्वं वा वाच्यं देवत्वादिकमादायात्मनि

लक्षणसमन्वयात्। रूपेति पृथिव्यग्नेजसां रूपवत्त्वं द्रवत्ववत्त्वं प्रत्यक्षविषयत्वञ्चेत्यर्थः। न च चक्षुरादीनां भर्जनकपालस्य वह्नेरुष्णस्य रूपवत्त्वे किं मानमिति वाच्यं तत्रापि तेजस्त्वेन रूपानुमानात् एवं वाय्वागीतपृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यं। न च घटादौ द्रुतसुवर्णादि भिन्ने तेजसि च द्रवत्ववत्त्वमव्याप्तमिति वाच्यं द्रवत्ववदवृत्ति द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् घृततैलप्रभृतिषु पृथिवी षु जलेषु द्रुतसुवर्णादौ तेजसि च द्रवत्ववत्त्वात् तत्र च पृथिवी त्वादिमत्त्वात्तदादाय सर्व्वत्र लक्षणसमन्वयः। न च प्रत्यक्ष विषयत्वं परमाण्वादावव्याप्तं अतिव्याप्तञ्च रूपादाविति वाच्यं चाक्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षित त्वात् आत्मन्यतिव्याप्तिवारणाय चाक्षुषेति गुरुणी इति गुरुत्व वत्त्वं रसवत्त्वं पृथिवीजलयोरित्यर्थः। न च घ्राणेन्द्रियादीनां वाय्वानीतपार्थिवादिभागानाञ्च रसादिमत्त्वे किं मानमिति वाच्यं तत्रापि पृथिवीत्वादिना तदनुमानात्। द्वयोरिति पृथिवीतेजसोरित्यर्थः न च नैमित्तिकद्रवत्ववत्त्वं घटादौ वह्न्यादौ चाव्याप्तमिति वाच्यं नैमित्तिकद्रवत्वसमानाधिकरण द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् आत्मानइति पृथिव्यग्नि जीवाव्याकाशात्मनां विशेषगुणवत्त्वमित्यर्थः यदुक्तमिनि श्रेय त्वादिकं विहाय इति बोध्यं तन्तु न कस्यापि वैधर्म्म्ये केवला न्वयित्वात् ते च सङ्ख्यादयः पञ्च खे आकाशे।

साधर्म्म्यवैधर्म्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरू

यथति तच्च क्षितिरित्यादिना गन्धहेतुरिति गन्धसमवायि कारणमित्यर्थः। यद्यपि गन्धवत्त्वमात्रं लक्षणमुचितं तथापि पृथिवीतजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तं तथाहि पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिध्यति अन्यथा गन्धत्वावच्छिन्नसङ्कल्पिकलापत्तेः न च पाषाणादौ गन्धाभावाद्गन्धवत्त्वमव्याप्तमिति वाच्यं तत्रापि गन्धसत्त्वात् अनुपलब्धिस्तु अनुत्कटत्वेनाप्युपपद्यते कथमन्यथा तङ्कणादि गन्धउपलभ्यते भक्षणेहि पाषाणध्वंसजन्यत्वात् पाषाणो पादानोपादेयत्वं सिध्यति यद्द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः दृष्टश्चैतत् खण्डपटे मद्यापटध्वंसजन्ये इत्यत्र च पाषाणपरमाणोः पृथिवीत्वाभावस्य पाषाणत्वापि पृथिवीत्वं तत्रापि तस्यापि गन्धवत्त्वे बाधकाभावः। नानारूपेति शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्त्तते नतु जलादौ तच्च शुक्लमेव सत्त्वात् पृथिव्यान्तु एकस्मिन्नपि धर्म्मिणि पाकजभेदेन नानारूपसम्भवात् न च जले नानारूपं नोत्पन्नं तत्राप्तेः रूपद्रवद्वृत्तिद्रव्यत्वव्याप्य जातिमत्त्वस्य रूपनाम्नवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा वाच्यत्वात् वैशेषिकमते पृथिवीपरमाणौ रूपनाम्नस्य रूपान्तरस्य च सत्त्वात् न्यायमते घटादावपि तत्सत्त्वात्तत्रणमसम्भवः। षड्विधरसेति मधुराम्लकटुकषायाद्यभेदेन यः षड्विधोरसः सपृथिव्यामेव जले च मधुरएव रसः अत्रापि पूर्ववद्रूपवद्द्रव्यवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थोऽवशेषः। गन्धवतीति

Digitized by Google

दिविधत्वमि वस्तुस्थितिमाचं नतु दिविधमन्यत्रत्वं तस्यैव दिविधस्य व्यर्थत्वात्ते त्रिधात्व कैरभाकैरभभेदेन वेत्यं। स्पर्शवतीति तस्याः पृथिव्याश्चनुष्मात्रौष्णस्पर्शवत्वं वायोरपि वर्त्तत इत्युक्तं पाकजवतीति इदानीं पृथिव्याः स्पर्शोऽनुष्णात्रौष्णताप्राप्त नार्थं तदुक्तं वस्तुतस्तु पाकजस्पर्शवत्त्वमात्रं लक्षणं अधिकस्य वैयर्थ्यात् यद्यपि पाकजस्पर्शः पटादौ नास्ति तथापि पाकज स्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थोलभ्यः। नित्येति या पृथिवी दिविधा नित्याऽनित्या चेत्यर्थः अणुरूपत्वा परमा णुरूपत्वा पृथिवी नित्या। तदन्या परमाणुभिन्ना पृथिवी द्व्यणु कादिः सर्वोऽप्यनित्यइत्यर्थः चैव अनित्या पृथिवीव अवयव वतीत्यर्थः। ननु अवयविनि किं मानं परमाणुपुञ्जेरेवोपपत्तेः न च परमाणूनामतीन्द्रियत्वात् घटादेः प्रत्यक्षं न स्यादिति वाच्यं एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्ष त्वात् यथा एकस्य केशस्य दूरेऽप्रत्यक्षत्वे तत्समूहस्य प्रत्यक्षत्वं न च एकः क्षुद्रोमहान् घटइति बुद्धेरनुपपत्तिरिति वाच्यं एकोमहान् भारवाहीरितिवदुपपत्तेः नैवं परमाणोरती न्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षायोग्यत्वात् दूरस्थकेशस्तु नातीन्द्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात्। न च तदानीं अदृष्ट परमाणुपुञ्जात् दृष्टपरमाणुपुञ्जस्योत्पन्नत्वात् न प्रत्यक्षत्वे विरोधइति वाच्यं अदृष्टस्य दृष्टानुपाहानत्वात् अन्यथा वपु रादिमत्तनौ कदाचिदृष्टत्वप्रसङ्गात्। न चातितप्ततैलादौ कथमदृष्टदहनसंयोगेनाग्निरिति वाच्यं तत्र तद्

भ्यःपतितिर्हस्वदृष्टावयवैः खूलदृष्टोत्पत्तेरुपगमात्। न चाद्यस्य द्व्यणुकेन कथं त्रसरेणोरुत्पत्तिरिति वाच्यं। यतोन यं दृश्यत्वमदृश्यत्वमा कस्यचित् स्वभावाद्दाक्यत्वात् परन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवत्त्वात् दृश्यत्वं तथाच त्रस रेणोर्महत्त्वात् प्रत्यक्षं नतु द्व्यणुकादेस्तदभावात् न हि तन्मते ऽपीदं सम्भवति परमाणौ महत्त्वाभावात् दृत्यं सावयवि सिद्धौ तेषामुत्पादविनाशयोः प्रत्यक्षत्वादनित्यत्वं तेषां साव यवावयवधारायाश्चनन्तत्वे मेरुसर्षपयोरपि साम्यप्रसङ्गः। अतः क्वचिद्विश्रामोवाच्यः यत्र च विश्रामस्तस्यानित्यत्वे तस्य सवेतभावकार्योत्पत्तिप्रसङ्गः स्यात् अतस्तस्य नित्यत्वं मह त्परिमाणतारतम्यस्य गगणादौ विश्रान्तत्वमिवाणुपरिमाण तारतम्यस्यापि क्वचिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्व सिद्धिः न च त्रसरेणावेव विश्रामोऽस्तिति वाच्यं त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्रसरेणोरवयवाः सावयवामहद्वयवत्वात् कपालवदित्य नुमानेन तदवयवसिद्धेः न चेदमप्रयोजकं अणुत्वमहत्त्वं प्रति अनेकद्रव्यवत्त्वस्य प्रयोजकत्वात् नचैवं क्रमेण तदवय वधारापि सिध्येदिति वाच्यं अनवस्थाभवेन तदसिद्धेः। सा च त्रिधेति या कार्य्यरूपा पृथिवी त्रिविधा शरीरेन्द्रियविषय भेदादित्यर्थः। तत्र देहमुदाहरति योनिजादीनि योनि जमयोनिजञ्चेत्यर्थः योनिजमपि जरायुजमण्डजञ्च जरा युजं मानुषादीनां अण्डजं सर्पादीनां अयोनिजं स्वेदजोद्भि

दादिकं स्वेदजाः डमिदमाद्याः उद्भिदस्तद्गुल्माद्याः नार
किणां शरीरमपि अयोनिजं न च मानुषादि शरीराणां
पार्थिवत्वे किं मानमिति वाच्यं गन्धादिमत्त्वमेव प्रमाण
त्वात् न च क्लेदउष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति
वाच्यं तथा सति जलत्वपृथिवीत्वादिना सङ्करप्रसङ्गात् न च
तर्हि जलत्वादिकमेवास्तु नतु पार्थिवत्वमिति वाच्यं क्लेदा
दीनां विनाग्नेऽपि शरीरत्वेन प्रत्यभिज्ञानात् गन्धाद्युपलम्भेन
पृथिवीत्वसिद्धेः एतेन पार्थिवादिशरीरे जलादीनां निमित्त
त्वमात्रं बोध्यं शरीरत्वन्तु न जातिः पृथिवीत्वादिना सङ्क
र्य्यात् किन्तु चेष्टाश्रयत्वं वृक्षादीनामपि चेष्टावत्त्वाच्चाग्निः
न च वृक्षादीनां शरीरत्वे किं मानमिति वाच्यं आध्यात्मि
कवायुसम्बन्धस्य प्रमाणत्वात्तत्रैव किं मानमिति चेत् भग्नक्ष
तरोहणादिना तदनुमानात् यदि वृक्षादौ शरीरव्यवहारो
न भवति तदाक्षावयवित्वेन विशेषणीयं न च यत्र शरीरे
चेष्टा न भाति तत्राग्निरिति वाच्यं एतादृशे प्रमाणाभा
वात् अथवा चेष्टावदवयवित्वमात्रवृत्तिद्रव्यत्वव्याप्यव्याप्य
जातिमत्त्वं तत् मानुषत्वचैत्रत्वजातिमादाय लक्षणसम
न्वयः न च नृसिंहशरीरे कथं लक्षणसमन्वयः तत्र सिंहत्वैक
व्यक्तिवृत्तितया जातित्वाभावात् जलीयतैजसशरीरवृत्ति
तया देवत्वस्यापि जातित्वाभावादिति वाच्यं कल्पभेदेन नृसिंह
शरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्। इन्द्रिय
मिति घ्राणेन्द्रियं पार्थिवमित्यर्थः पार्थिवत्वं कथमिति चेत्

Digitized by Google

दृत्वं घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् कुङ्कुमगन्धादिव्यञ्जकघृतवत् न च दृष्टान्ते स्वकीयरूपादि व्यञ्जकत्वादसिद्धिरिति वाच्यं परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात् न च नवसरावगन्धव्यञ्जकजलेनानैकान्तमिति वाच्यं तस्य भक्तुरसाभिव्यञ्जकत्वात् यदा परकीयेति न देयं वायूपनीतसुरभिभागस्य दृष्टान्तत्वसम्भवात् न च घ्राणेन्द्रिय सन्निकर्षस्य गन्धमात्रव्यञ्जकत्वान्नात्र व्यभिचारइति वाच्यं द्रव्यत्वे सति इति विशेषणात् विषयइति उपभोगसाधनं विषयः सर्वमेव हि कार्य्यजातं अदृष्टाधीनं तु कार्य्यं यददृष्टाधीनं तत्तदुपभोगं साक्षात् परम्परया वा जनयत्येव। न हि बीज प्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्तितेन द्व्यणुकादिब्रह्माण्डं सर्वमेव विषयोभवति शरीरेन्द्रिययोर्विषयत्वेऽपि प्रकारान्त रोपन्यासः शिष्यबुद्धिवैशद्यार्थः। जलं निरूपयति वर्णः शुक्ल इति स्नेहसमवायिकारणतावच्छेदकतया जलत्वं जातिः सिध्यति यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्य्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यं अथ परमाणौ जलत्वं न स्यात् तत्र जन्यस्नेहाभावात् नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावनियमादिति चेन्न जन्यस्नेहजनकतावच्छेदकतया जन्यजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धेः शुक्लरूपवत्त्वमेव ग्रन्थितुमुक्तं वर्णः शुक्लइति वस्तुस्थितिमात्रं न तु शुक्लरूपवत्त्वं लक्षणं अथवा नैमित्तिकद्रवत्ववद् वृत्तिरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं अभास्वरशुक्लेत

रूपाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः। रसस्तर्हीति जलस्य मधुरएव रसः शीतस्पर्शनिरूपितवृत्तिमधुररूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं ननु शुक्लरूपवत्त्वमेवेति कुतः काश्मिन्नीलजलादौ नीलोपलब्धेरिति चेन्न नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावात् जले नीलरूपाश्रयत्वात् काश्मिन्नीलजले नीलप्रतीतिः साम्बयोपाधिकी अत एव वियति विशेषे भवतिनोपलब्धेः अथ जले माधुर्यं किं नित्यं नहि प्रत्यक्षेण कोऽपि रसस्तत्रानुभूयते न च पानादिकेजलादौ माधुर्यमुपलभ्यत एवेति वाच्यं तत्रापि सोपाधिकत्वात् अन्यथा अम्लीररसादावम्लानुपलब्धेरम्लादित्वमपि स्यादिति चेन्न हरीतक्यादिभक्षणस्य जलरसव्यञ्जकत्वात् न च हरीतक्यादेव जलोष्णसंयोगाद्रसाक्षरोत्पत्तिरिति वाच्यं कल्पनागौरवात् पृथिवीत्वस्याम्लादिजनकतावच्छेदकत्वाच्च जलेनाम्लादिकं अम्लीररसादौ तु नित्याश्रयोपाधिकी तथा प्रतीतिः एवं जन्यशीतस्पर्शजनकतावच्छेदकं जलत्वं जन्यजलत्वं वा नेयं घृतचन्द्रादौ तु नैत्योपलब्धिस्तन्नाम्नि शीतस्पर्शनित्यजलस्य तेजःसंयोगाज्जले औष्ण्यप्रतीतिरौपाधिकी स्फुटैव तत्र पाकाश्रयत्वात् स्नेहस्यचेति घृतादावपि तदाख्यशीतस्पर्शनित्यजलस्यैव स्नेहः जलस्य स्नेहसमवायिकारणत्वात् तेन जलएव स्नेहइति मन्तव्यं। द्रवत्वमिति सांसिद्धिकद्रवत्वं जातिविशेषः प्रत्यक्षसिद्धस्यदनकतावच्छेदकमपि तदेवेति भावः तैलादावपि जलस्य द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूलमिति

यच्छति प्रथमवहिति पृथिव्यादयेत्यर्थः तथाहि जलनं द्विविधं नित्यमनित्यञ्च परमाणुरूपं नित्यं द्व्यणुकादिकं कार्य्यं मनित्यं अवयवसमवेतञ्च अनित्यमपि त्रिविधं शरीरेन्द्रिय विषयभेदात् किन्तु पृथिवीतोयवृत्तिविशेषवत्त्वमाह किञ्चिति अयो निजमिति अयोनिजमेवेत्यर्थः अयोनिजं शरीरमयोनिजं वदन्ति लोके प्रसिद्धमिति। दृक्चियं रसनं जलीयमित्यर्थः तथाहि रसनं जलीयं गन्धाश्रयसंसृष्टत्वे सति रसव्यञ्जकत्वात्। यत्तु रसाभिव्यञ्जकोदकवत् रसवत्सन्निकर्षे व्यभिचारवारणाय इत्यलं देयं। विषयं दर्शयति सिन्धुर्हिमादिरिति सिन्धुः समुद्रः हिमं तुषारः आदिपदात् घरित्कासारकरकादिः सर्वोग्राह्यः। न च हिमकरकयोः कठिनत्वात् पार्थिवत्वमिति वाच्यं उष्णेन विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात् यद्द्रव्यं यद्द्रव्यध्वंसजन्यं इति व्याप्तेर्जलोपादाने उपादेयत्वसिद्धेः। यद्वा विशेषेऽपि वा द्रवत्वविरोधात् करकादीनां काठिन्य प्रत्ययस्य भ्रान्तत्वात्। तेजोनिरूपयति। स्पर्शउष्णत्वादिवान् उष्णत्वं स्पर्शनिष्ठोजातिविशेषः प्रत्यक्षसिद्धं रत्वञ्च अम्भोऽग्न्य स्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः तच्च परमाणुवृत्तिनित्यं तु जलत्वक्षेत्रानुरूपभेदं न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यं तत्रापि उष्णस्पर्शात् किन्तु तद्व्यःपाकिजशीतस्पर्शेनाभिभवादग्रहः एव रत्नकिर णादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वादग्रहः। रूपमित्यादि तेजोवरे मरकतकिरणादौ च पार्थिवरूपेणा

भिभवात् मुक्तत्वाग्रहः ननु तद्रूपाग्रहे धर्मिग्राहोऽपि चाक्षुषत्वं न स्यादिति चेन्न अन्यदीयरूपेऽपि धर्मिग्राहस्यसम्भवात् अन्यत्र खेव पित्तपीतिमा वक्ष्येत्तु गुरुत्वं नाभिभूतं किन्तु तदीयं गुरुत्वं नाभिभूतमित्यन्ये नैमित्तिकमिति सुवर्णादिरूपे तेजसि तत्त्वात्। न च नैमित्तिकद्रवत्वत्वं न लक्षणं दहनादावव्याप्तेर्घृतादावतिव्याप्तेश्चेति वाच्यं पृथिव्यवृत्तिनैमित्तिकद्रवत्वव दृत्तिजातिमत्त्वस्य विवक्षितत्वात् पूर्ववदिति अलक्ष्येत्यर्थः तथाहि तद्विविधं नित्यमनित्यञ्च नित्यं परमाणुरूपं तदन्यद नित्यं अवयवि तच्च त्रिधा शरीरेन्द्रियविषयभेदात् शरीरम योनिजमेवेत्यर्थः तच्च सूर्यलोकादौ प्रसिद्धं अत्र योनिग्रहणस्य माद्य इन्द्रियमिति चक्षुस्तैजसं परकीयरूपाग्राह्यत्वव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत् प्रदीपस्य स्वीयरूपाग्राह्यत्वव्यञ्जक त्वाद्यं परकीयेति घटादेः स्वीयरूपव्यञ्जकत्वात् व्यभिचार वारणाय द्वितीयं परकीयेति अथवा प्रभावाद्दृष्टान्तासङ्गतेर्वा द्यं परकीयं न देयं चक्षुःसन्निकर्षे व्यभिचारवारणाय द्वयमपि देयं। विषयं दर्शयति वक्ष्यति ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न सुवर्णं तैजसं असति प्रतिबन्धके अत्यन्तासङ्ग संयोगेऽप्यवच्छिन्नजन्यद्रवत्वात् यत्रैवं तत्रैवं यथा पृथिवी न चाप्रयोजकं पृथिवीद्रवत्वस्य अन्यजलद्रवत्वस्य चाग्निसंयो गनाश्यत्वात् ननु पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रुतत्वात्तेन व्यभिचारइति चेन्न जलमध्यस्थमसीलोदकवत् तस्याद्रवत्वात् अपरे तु पीतिमाश्रयस्य अत्यन्ताग्निसंयोगेऽपि

रूपापरावृत्तिदर्शनात् तत्प्रतिबन्धकविजातीयं द्रवत्वं कल्प्यते तथाहि अग्निसंयोगे पीलिमगुरुत्वाश्रयः विजातीयरूपप्रतिबन्धकद्रव्यसंयुक्तः अत्यन्ताग्निसंयोगेऽपि पूर्व्वरूपविजातीयरूपानधिकरणपार्थिवत्वात् जलमध्यस्थपीतपटवत् तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात्॥ वायुं निरूपयति। अपाकजस्पर्शवदिति अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तं अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तं अनुष्णाशीतस्पर्शवदिति तेन वायवीयविजातीयस्पर्शोदर्शितः तज्जनकतावच्छेदकं वायुत्वमिति भावः। एषवायुः स्पर्शादिलिङ्गकः वायुर्हि स्पर्शवद्द्रव्यत्वधृतिकम्पैरनुमीयते विजातीयस्पर्शेन विलक्षणस्पर्शेन तृणादीनां धृत्या ग्राखादीनां कम्पेन च वायोरनुमानात् यथा च वायोर्न प्रत्यक्षं तथाग्रे वक्ष्यते पूर्व्ववदिति वायुर्द्विविधः नित्योऽनित्यश्च परमाणुरूपोनित्यस्तदन्योऽनित्यः समवेतश्च सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात् तत्र शरीरमयोनिजं पित्राद्यादीनां परन्तु जलीयतैजसवायवीयशरीराणां पार्थिवभोगोपष्टम्भादुपभोगसाधनत्वं जलादीनां प्राधान्याज्जलीयत्वमिति अत्र योगिविशेषस्तमाह देहव्यापीति शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं त्वक् तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात् अङ्गसङ्गिसलिलस्यैत्यव्यञ्जकव्यजनवातवत्विविधं दर्शयति प्राणादिरिति यद्यपि अनित्योवायुस्चतुर्व्विधः तस्य चतुर्थो विधा प्राणादिरित्युक्तमाकरे तथापि सचेपादत्र त्रिविधमुक्तं प्राणस्त्वेकएव हृदादिनानास्थानवशान्मुखनिर्गमा

दिनागाभिप्रायवशाच्च नागार्जुना अमतदूति। आकाशं सिद्ध यति। आकाशस्येति आकाशकालदिगात्मैकैकत्वाभित्वात् आकाशमादिकं न जातिः किन्तु आकाशत्वं द्रव्यत्वं वैशेषि करति कथमन्यु विशेषगुणान्तरव्यवच्छेदाय एतेन प्रमाण मपि दर्शितं तथाहि द्रव्येविशेषगुणः चक्षुर्ग्रहणायोग्यबहि रिन्द्रियग्राह्यजातिमत्वात् स्पर्शवत् द्रव्यसमवेतः गुण त्वात् संयोगवत् इत्यनुमाने द्रव्यस्य द्रव्यसमवेतत्वे सिद्धे द्रव्येन स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वा भावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत् पाकज रूपादौ व्यभिचारवारणाय सत्यन्तं घटरूपादौ व्यभिचार वारणाय कारणगुणपूर्वकेति जलपरमाणुरूपादौ व्यभिचार वारणाय प्रत्यक्षेति द्रव्येण दिक्कालमनोगुणः विशेषगुण त्वात् नात्मविशेषगुणः बहिरिन्द्रियग्राह्यत्वात् रूपवत् इत्यत्र द्रव्याधिकारत्वं नवमद्रव्यं गगणनामकं सिध्यतीति न च वाय्व वधवेषु सूक्ष्मद्रव्यकमेव वायौ कारणगुणपूर्वकः द्रव्यउत्पा दतामिति वाच्यं अयावद्द्रव्यभाविस्पर्शेन वायुविशेषगुणत्वा भावात् तच्च शरीरस्य विषयस्य चाभावात्। दृष्टिर्यं दर्शयति दृष्टिरयमिति तन्वाकाशं स्वाश्रयादेकं सिद्धं श्रोत्रं पुरुषभेदेन भिन्नं कथमाकाशं स्यादतआह एकः सन्नपीत्यादि आकाशएक एव सन्नपि उपाधेः कर्णशष्कुल्यादेर्भेदाद्भिन्नं श्रोत्रात्मकं भ वतीत्यर्थः। कालं निरूपयति अन्यागामिति तच्च प्रमाणं दर्श यितुमाह जगतामिति तथाहि इदानीं घटइत्यादिप्रतीतिः

सूर्य्यपरिस्पन्दादिकं यदि विषयीकरोति तदा सूर्य्यपरिस्प
न्दादिना घटादेः सम्बन्धोवाच्यः स च संयोगादिर्न संभवती
ति कालएव तत्सम्बन्धघटकः कल्प्यते इत्यस्य तस्याश्रयत्व
मपि सम्यक् प्रमाणान्तरं दर्शयति परापरेति परत्वापरत्व
बुद्धेरसाधारणं निमित्तं कालएव परत्वापरत्वयोरसमवायि
कारणसंयोगाश्रयोत्साधवादतिरिक्तः कल्प्यतइति भावः।
नन्वेकस्य कालस्य सिद्धौ षण्मासवर्षादिसमयभेदेन
खादतआह षण्मासादिरिति कालस्यैकोऽपि उपाधिभेदात्
षण्मासादिव्यवहारविषयः उपाधिस्तु स्वजन्यविभागप्रागभावा
वच्छिन्नं कर्म पूर्वसंयोगनाशावच्छिन्नविभागोवा पूर्वसंयोगना
शावच्छिन्नउत्तरसंयोगप्रागभावोवा उत्तरसंयोगावच्छिन्नं
कर्म्म वा न चोत्तरसंयोगानन्तरं षण्मासव्यवहारोन खादिति
वाच्यं कर्म्मान्तरस्यादिति महाप्रलये षण्मासादिव्यवहारो
यद्यपि तदानाश्रयत्वा भंसेनोपपादनीयः दिगादिव्यवहा
रस्तु तत्तत्पदकूटैरेवेति। दिशं निरूपयति दूरान्तिकेति
दूरत्वं अन्तिकत्वञ्च दैशिकं परत्वमपरत्वं बोध्यं तदुद्धेर
साधारणं बीजं दिगेव दैशिकपरत्वापरत्वयोरसमवायि
कारणसंयोगाश्रयतया दिक् सिध्यतीति भावः। नन्वेकैव दिक्
यदि तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यतामित्यत
आह उपाधीति यत्पुरुषस्य उदयगिरिसन्निहिता या दिक्
सा तस्य प्राची उदयगिरिव्यवहिता च प्रतीची एवं तत्पुरुषीय
सुमेरुसन्निहिता दिगुदीची तद्व्यवहिता तथाची सर्व्वेषामेव

र्थार्थां प्रेरयत्यन्तरतः स्थितरूपे नियमात्। आत्मानं निरूपयति आत्मेन्द्रियेति आत्मत्वजातिस्तु सुखदुःखादि समवायिकारणतावच्छेदकतया सिध्यति ईश्वरेऽपि सा जा तिरस्त्येव महत्त्वादिरूपकारणाभावाच्च न सुखदुःखाद्युत्प त्तिः नित्यस्य स्वरूपयोग्यस्य फलावच्छिन्नत्वरूपं नित्य मस्मात्प्रयोजकत्वात् परेशेश्वरे वा जातिर्नास्त्येव प्रमाणा भावात् न च द्रव्यत्वव्याप्यजातिः ज्ञानवत्त्वेन विभजनादिति भरद्वि इन्द्रियादीति इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः। यद्यप्यात्मनि अहं ज्ञाने अहं सुखीत्यादि प्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रयत्नत एव शरीरादिभिन्नत्वसाधकयोगिसाक्षात्त्वमिति प्रतिपादयितुं न प्रत्यक्ष इत्युक्तः प्रमाणं दर्शयति करणमिति कुठाराद्दीनां छिदादि करणानां कर्त्तारमन्तरेव फलानुपधानं दृष्टं एवं चक्षुरा दीनां ज्ञानकरणानां पक्षीभूतमपि कर्त्तारमन्तरेणोप पद्यतइत्यतिरिक्तः कर्त्ता कल्प्यते ननु शरीरमेव कर्त्तृमस्तु अतआह शरीरस्येति ननु चैतन्यं ज्ञानादिकमेव मुक्तात्मनां मस्मादेवमृतशरीराणामपि तदभावेका क्षतिः प्राक्षाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न शरीरस्य चैतन्ये वाधे विशे षगुणस्य ज्ञानादेरसाधारणकारणानुपपत्तेः शरीराणामवयवोपचय क्षयैरुत्पादविनाशप्रसक्तेश्च न च पूर्वशरीरोत्पत्तसंस्कारे ण द्वितीयशरीरे संस्कारजन्यत्वमस्तीति वाच्यं प्रमाणसंस्कार कल्पने गौरवात् एवं शरीरस्य चैतन्ये वाधकमस्त्व

यावादो प्रवृत्तिर्न स्यात् दृष्टसाधनताज्ञानस्य तद्धेतुता
त्तदानीमिष्टसाधनतास्मारकाभावात् मन्यते अन्यानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः न च अन्या
नुभूतमन्यदपि स्मर्यतामिति वाच्यं उद्बोधकाभावात्
अत्र अनाद्यया जीवनादृष्टमेवोद्बोधकं कल्प्यते दृष्टस्य संस्कारे
णादितया आत्मनोऽपि अनादित्वसिद्धौ अनादिभावस्य
नाशासम्भवात् नित्यत्वं सिध्यतीति चेत्यं नन्वु चक्षुरादीनां
ज्ञानादौ करणत्वं कार्यत्वं वास्तु विरोधिबाधकाभावादनाद्य
नद्यात्मेति चैतन्यमित्यर्थः उपघाते नाशे सति अर्थाच्चक्षुरा
दीनामेव कथमिति पूर्वं चक्षुषा दृष्टानामचक्षुषोऽभावे
स्मरणं न स्यात् अनुभवितुरभावात् अन्यदृष्टस्य अन्येन स्मरणा
सम्भवात् अनुभवस्मरणयोः स्वामानाधिकरण्येन कार्यकारण
भावादिति भावः। ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु
नित्यस्य चैतन्यं स्यात् अतआह मनोऽपीति न तथा न चेतनं
ज्ञानादीति मनसोऽणुत्वात् प्रत्यक्षे च महत्त्वस्य हेतुत्वान्नवहि
ज्ञानसुखादिवत्वे तत्प्रत्यक्षानुपपत्तेरित्यर्थः यथा मनसो
ऽणुत्वं तथा वक्ष्यते नन्वस्तु विज्ञानमेव आत्मा तस्य स्वतः
प्रकाशरूपत्वात् चैतन्यं ज्ञानसुखादिकन्तु तत्तदाकारविशे
षः तस्यापि भावत्वादेव क्षणिकत्वं पूर्वपूर्वविज्ञानक्षीणसं
विज्ञाने हेतुत्वात् सुषुप्तावप्यात्मविज्ञानधारा विरावाधैव
दृष्टमदवासनायावत्तदेव पूर्वपूर्वविज्ञानजनितसंस्काराद्य
नुत्तरोत्तरविज्ञाने संक्रान्तत्वाज्ञानुपपत्तिः स्मरणादेरिति

चेन्न तस्य जगद्विषयत्वे सार्व्वज्ञापत्तेः चक्षिक्षिद्विषयत्वे विनि गमनाभावः सुषुप्तावपि विषयावभासप्रसङ्गः तदानीं निरा कारा चिन्मात्रतिरनुवर्त्तत इति चेन्न तस्य स्वप्रकाशत्वे प्रमाणा भावात् अन्यथा घटादीनामपि ज्ञानत्वापत्तिः न चेष्टा पत्तिः विज्ञानव्यतिरिक्तवस्तुनोऽभावादिति वाच्यं घटादे रनुभूयमानस्यापलपितुमशक्यत्वात् आकारविशेष एवायं वि ज्ञानस्येति चेत् किमयमाकारोऽतिरिच्यते विज्ञानात्नहि समवायात् विज्ञानव्यतिरिक्तेन नातिरिच्यते चेन्नहि समूहा लम्बने नीलाकारोऽपि पीताकारः स्यात् स्वरूपतोविज्ञानस्या विशेषादपीदरूपोनीलत्वादिर्विज्ञानधर्म्मइति चेन्न नीलत्वा दीनां विरुद्धानामेकस्मिन्समावेशात् इतरथा विरोधश्चैव दुरुपपन्नत्वात् न च वासनासंक्रमः संभवति ग्राह्यग्राहकयोरपि वासनासंक्रमप्रसङ्गात् न च उपादानोपादेयभावोनियामक इति वाच्यं वासनायाः संक्रमासंभवात् उत्तरविज्ञानोत्पत्तिरेव संक्रमइति चेन्न तदुत्पादकाभावात् उत्तरविज्ञानस्यैव उत्पा दकत्वे तदानन्त्यप्रसङ्गः क्षणिकविज्ञानेऽनित्यत्वविरोधः कल्प्यत इति चेन्न मानाभावात् कल्पनागौरवाच्च एतेन क्षणिकशरीरे ष्वेव चैतन्यमपि प्रत्युक्तं गौरवादतिप्रथि मानाभावाच्च वीजा दावपि सहकारिसमवधानादेवोपपत्तेः कुर्व्द्रूपत्वाकल्पनाच्च अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा अवि नाशी वा अरे अयमात्मा सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि श्रुत रिति चेन्न तस्य विषयलाभसम्भवस्य दर्शितत्वात् निर्व्विषयस्य

ज्ञानले ज्ञानाभावात् सविषयसाम्यानुभवात् अतोऽज्ञान
निवृत्तिनित्यज्ञानेति सिद्धं सत्यं ज्ञानमिति ब्रह्मपरं जीवेषु
नोपपद्यते ज्ञानाज्ञानसुखितदुःखितादिभिर्जीवानां भेद
सिद्धौ सुतरामीश्वरभेदोऽन्यथा बन्धमोक्षानुपपत्तेः योऽपी
श्वरभेदबोधकोवेदः योऽपि तदभेदेन तदीयत्वं प्रतिपादयन
सीति अभेदभावने च यतितव्यमिति वदति अतएव सर्व्व
एव आत्मनि समर्पितादृति भूयते मोक्षदशायामज्ञान
निवृत्तावभेदोज्ञायतदत्यपि न भेदस्य नित्यत्वे ज्ञाप्योनात्
भेदज्ञेऽपि व्यक्तिदयं स्वाश्रयेव न च दिवसमपि नश्यतीति
वाच्यं तच निर्दुर्ग्यके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तद्दि
नित्वत् दिवाभावेऽपि दयात्मकौ तावितिं सुवचत्वात् मिथ्या
त्वाभावोऽधिकरणात्मकस्य सत्यत्वमिति चेत् एकत्वाभावो
व्यक्तिदयात्मकोदिवसमपुच्यतां प्रत्येकमेकत्वेऽपि पृथिवीत्व
योर्ग गन्धवदृतिवदुभयं नैकमित्यस्य सर्व्वजनसिद्धत्वात् योऽपि
तदानीमभेदप्रतिपादकआगमः योऽपि निर्दुःखादिना साम्यं
प्रतिपादयति संपदाधिक्ये पुरोहितोऽयं राजा संवृत्तवदृतिवत्
अतएव निरञ्जनः परमं साम्यमुपैति भूयते ईश्वरोन ज्ञान
सुखात्मा किन्तु ज्ञानाद्याश्रयः नित्यं विज्ञानमानन्दं ब्रह्म
दत्यादौ विज्ञानपदेन ज्ञानाश्रयएवोक्तः यः सर्व्वज्ञवदृत्यनु
रोधात् आनन्दवदृत्यस्यापि आनन्दवदित्यर्थः अन्नमयादिता
मतर्थीयाच्प्रत्ययात् अन्यथा पुंस्त्वापत्तेः आनन्दोऽपि
दुःखाभावे उपपद्यते भारावपगमे सुखी संवृत्तोऽहमिति

वस्तु दुःखाभावेन सुखित्वप्रत्ययात् अस्तु वा तस्मिन्नानन्दोनन्द
सावानन्दमित्यत्र मनसीवप्रत्ययविरोधात् आनन्दं ब्रह्मणो
विद्वान् बिभेति कदाचनेत्यत्र भेदस्य स्पष्टत्वाच्चेति संक्षेपः
एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किन्तु
चेतनः कार्य्यकारणयोरभेदात् कार्य्यनाशे कार्य्यरूपतया
नाशः स्यादित्यकारणत्वं तस्य बुद्धिगतचैतन्याभिमानान्यथा
नुपपत्त्या तत्कल्पनं बुद्धेश्च प्रकृतेः परिणामः सैव महत्तत्व
मन्तःकरणमुच्यते तस्यात्मस्वभावं पुरुषस्य संसारापवर्गौ
तस्यापैन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना
सम्बन्धः पुरुषे कर्तृत्वाभिमानोबुद्धौ चैतन्याभिमानश्च भेदा
ग्रयत्नात् मनेदं कर्त्तव्यमिति महंमपुरुषोपरागोबुद्धेः स्वच्छ
तया चेतनप्रतिबिम्बादतात्त्विकोदर्पणस्येव मुखोपरागः इद
मिति विषयोपरागः इन्द्रियप्रणालिकया परिणतिभेदस्या
त्विकोनिसासाभिचेतदर्पणस्येव मलिनिमा कर्त्तव्यइति व्यापा
रादिभ्रः तेनांशत्रयवती बुद्धिस्तत्परिणामेन ज्ञानेन पुरुष
स्यातात्त्विकः सम्बन्धोदर्पणमलिनेव मुखोपलब्धिरुच्यते ज्ञाना
दिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्माश्रपि बुद्धेरेव इति
सामानाधिकरण्येन प्रतीतेः। न च बुद्धिचैतन्यपरिणामित्वा
दिति मतमभ्यासं स्यादृष्टभोगानामिव चैतन्यस्यापि सामा
नाधिकरण्यप्रतीतेः तद्विषये मानाभावाच्चेतनोऽहं करोमीति
प्रतीतेः परिणामित्वाचैतन्यांशे भ्रमइति चेत् स्यादंशे यि
नेष्यते अन्यथा बुद्धेर्नित्यत्वे मानाभावोऽनिष्टसे तत्पूर्वम्

केशाराधनिः अचेतनाथाः प्रकृतेः कार्यत्वात् घटादेरचैतन्यं कार्यकारणयोरभेदादात्मादिनि चेन्न अविद्वेः कर्तृत्वेऽपि भोगाभावात् वीतरागजन्मादर्शनादहंकारादिनं जगदेर्नाशप्रसङ्गात् सिद्धान्तं तत् किं प्रकृत्यादिकल्पनेव न च प्रकृतेः किंचमाणानि गुणैः कर्माणि सर्वथाः। अहङ्कारविमूढात्मा कर्ताहमिति मन्यते इत्यनेन विरोधदति चाच्यं प्रकृतेरदृष्टत्व गुणैरदृष्ट मन्यैर्गुणैः इच्छादिभिः कर्तारं कर्ताहमेव इत्यस्य तदर्थ त्वात् तथैवं सति कर्तारमात्मानं केवलमुपदित्यादि वदता भगवता प्रकृतीक्षतिऽवमुपदिष्टादात्मवदति संक्षेपः ॥ धर्मा धर्माश्रयदति। चात्मोत्पत्तिसमवाये शरीरस्य तदाश्रयत्वे देहा न्तरदृष्टकर्मणां देहान्तरेऽभोगानुपपत्तेः विशेषगुणयोगात इति योगविशेषगुणजन्येनात्मनः प्रत्यक्षं भवति न त्वन्यथा अहं जाने अहङ्करोमि इत्यादि प्रतीतेः प्रकृतीति अत्र आत्मा परदेहादौ प्रकृत्यादिनानुमीयते प्रकृतिरत्र चेष्टा ज्ञानेच्छाप्रयत्नादीनां देहे अभावेनात्मात्मत्वात् चेष्टावान् बलवत्साध्यत्वात् चेष्टया प्रयत्नवानात्मात्यनुमीयतदति भावः नन्व इष्टानमाह रथेति यद्यपि रथकर्मणेष्टा न भवति तथापि तेन कर्मणा सारथिर्यत्नमनुमीयते तथा चेष्टाजन्येन कर्मणा परात्मेति शेषः। अहङ्कारश्चेति अहङ्कारोऽह मिति प्रत्ययः तस्मान्नायोविषयः आत्मनि शरीरादिरिति मन इति मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयोमानसप्रत्यक्षविषयश्चेत्यर्थः रूपाद्यभावेनेन्द्रियाणामयोग्यत्वात् विभुरिति विभुत्वं

Digitized by Google

परममहत्त्वं तच्च पूर्वोक्तमपि स्पष्टार्थमुक्तं बुद्ध्यादीति बुद्धि सुखदुःखेच्छादिचतुर्दशगुणाः पूर्वोक्तावेदितव्याः अत्रैव प्रसङ्गादृष्टेः कतिपयप्रपञ्चं दर्शयति बुद्धिश्चेति द्वैविध्यं व्युत्पादयति अनुभूतिरिति अनुभूतिश्चतुर्विधेति एतासाञ्चतसृणां करणानि प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूचोक्तानि वेदितव्यानि प्रत्यक्षमिति इन्द्रियजन्यं ज्ञानं प्रत्यक्षं यद्यपि मनोरूपेन्द्रियजन्यं सर्व्वमेव ज्ञानं तथापि इन्द्रियत्वेन रूपेण इन्द्रियाणां यच्च ज्ञाने कारणत्वं तत्प्रत्यक्षमिति विवक्षितं ईश्वरप्रत्यक्षन्तु न लक्ष्यं इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्य अव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति सूत्रे तथैवोक्तत्वात् अथ वा ज्ञानाकरणकं ज्ञानं प्रत्यक्षं इदं लक्षणं ईश्वरप्रत्यक्षसाधारणं इत्यनुमितौ व्याप्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणेऽनुभवस्य च हेतुत्वान्न तच्च तथातिव्याप्तिः परामर्शजन्यं ज्ञानमनुमितिः, यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं हेत्वविषयकं यज्ज्ञानं तदेवानुमितिः न च कादाचित्कहेतुविषयकानुमितावव्याप्तिरिति वाच्यं तादृशज्ञानत्वमनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् अथ वा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः पदज्ञानकरणकं ज्ञानं शाब्दबोधः वस्तुतोयत्किञ्चिदनुमितित्वमादाय तद्वृत्तिजातिमत्त्वं अनुमितित्वं एवं यत्किञ्चित् प्रत्यक्षादि

त्मादाय तद्ग्राहिइन्द्रियेण यति यत्किञ्चिदनुमितिव्यक्तिजन्यज्ञान तद्वृत्तिजातिमत्वं प्रत्यक्षलक्षणं वाच्यमिति। ज्ञानजन्येति ज्ञानजन्यरागवत् चाक्षुषं सार्शनं यौगं मानसमिति षड्विधं प्रत्यक्षं नचेश्वरप्रत्यक्षलक्षणविभजनानुपपन्नं अन्नप्रत्यक्षत्वेन निरूपणी यत्वात् उक्तसूत्रानुपपत्तेः योगपदेति पाठस्तदसाधुः। गन्धत्वादिरिति आदिपदात् सुरभिलासुरभिमत्परिग्रहः गन्धत्व प्रत्यक्षत्वात्तदृत्तिजातिरपि प्रत्यक्षा गन्धाजन्यप्रत्यक्षे तु ज्ञानस्य न सामर्थ्यमिति बोध्यं तथा रसवदिति रसत्वादिसहित इत्यर्थः गन्धोरसस्य उद्भूतोबोध्यः तथा मन्दत्वादिसहित उद्भूतरूपमिति यौगोक्तादावनुद्भूतरूपमिति न चाक्षुषं प्रत्यक्षं तदस्ति उद्भूतरूपवत्ति योग्येति पृथक्त्वादिकमपि योग्यद्रव्यवृत्ति तथा यावद्द्रव्यभावि योग्यवृत्तीत्यर्थः चक्षुर्योग्यत्वमेव कुतो तदाह गृह्यतीति आलोकसंयोगउद्भूतरूपञ्च चाक्षुषप्रत्यक्षं प्रति कारणं तच्च द्रव्यचाक्षुषं प्रति त्रयोः समवायसम्बन्धेन कारणत्वं द्रव्यसमवेतप्रत्यक्षं प्रति स्वाश्रयसमवायसम्बन्धेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेनेति उद्भूतस्पर्शश्च द्रव्यं त्वयोगीश्वरः सोऽपि उद्भूत स्पर्शोऽपि स्पर्शत्वादिरहितः रूपाश्रयादिति रूपभिन्नरूपत्वादि भिन्नस्य चक्षुषोयत् योग्यं तत् लिङ्गिज्ञेयत्वापि यावद्द्रव्यभावि तथाच पृथक्त्वादिसंख्यादयोपि चक्षुर्ग्राह्यानुद्भूताश्च एवं क्रिया एवं जातयोपीत्यनुपपन्नं ते त्वयोग्यास्तदिति अत्रापि लिङ्गिज्ञेय अन्येऽपि रूपं द्रव्यप्रत्यक्षे कारणं तत्राच नद्दिरिन्द्रियजन्य

प्रत्यक्षत्वे रूपं कारणमिति चेन्न बहिरिन्द्रियप्रत्यक्षे रूपं न कारणं प्रमाणाभावात् किन्तु चाक्षुषप्रत्यक्षे रूपं साक्षात्प्रत्यक्षे द्रव्यं कारणं चक्षुरतिरेकात् बहिरिन्द्रियप्रत्यक्षद्रव्यत्वप्रत्यक्षे व्याप्येच्छाकारणमिति चेत्न किञ्चिदात्मादिमनःप्रभृतिविशेषगुणानां वा प्रतीतिकमत्व रूपत्व कारणत्वे लाघवमिति चेन्न चक्षुरिन्द्रियाद्यवयवप्रत्यक्षादिष्टापत्तिरिति चेत् सर्वत्र एव ज्ञानत्वज्ञानत्वजत्व प्रमात्वाप्रमात्वप्रत्यक्षत्वे निष्टापत्तिरित्यधिकं गच्छात् तद्वत् प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्यक्षत्वात् वायोरपि प्रत्यक्षं भवत्येव बहिरिन्द्रियप्रत्यक्षमात्रे तु न रूपत्व न वा सर्वत्र हेतुत्वं वायुप्रभयोरेकत्वं पृथक्त्वमेव क्वचित् द्वित्वादिकमपि क्वचित् संख्यापरिमाणाद्यवयवदोषादित्याशङ्क्य। मनोयोगेऽनक्षजं ज्ञानकारणमिति तन्मनःसंयोगोज्ञान जन्यत्वे कारणमित्यर्थः किं च प्रमाणं सुषुप्तिकाले सर्वं त्यक्त्वा पुरीतमिति वर्त्तमानेन मनसा ज्ञानावगमिति ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपं वा नाद्यः अनुभवसामग्र्यभावात्तथाहि चाक्षुषादिप्रत्यक्षे चक्षुरादिजन्य मनःसंयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादिप्रत्यक्षं ज्ञानादेरभावादेव न मानसप्रत्यक्षं ज्ञानाद्यभावेनात्मनोऽपि न प्रत्यक्षमिति व्याप्तिज्ञानाभावात् नानुमितिः सादृश्यज्ञानाभावात् नोपमितिः पदज्ञानाभावात् न शाब्दबोधः स्मरणानुभव ज्ञानसामग्र्यभावात् नानुभवः संस्कारकाभावाच्च न स्मरणं तथा सुषुप्तिज्ञानलोपपक्षे चक्षुरादिजन्यलौकिकसन्निकर्षजन्य प्रत्यक्ष

प्रसङ्गात् तदतीन्द्रियत्वे मानाभावात् सुषुप्तिप्राक्काले निर्मि
त्तकत्वेन आयतदृक्त्वापि प्रमाणाभावात् अथ ज्ञानजन्ये
लक्षणसंयोगत्व यदि कारणं तदा रासनचाक्षुषादिप्रत्य
क्षकाले स्मरणप्रसङ्गः स्यात् विषयलक्षसंयोगत्व लक्षणसंयो
गत्व च सत्त्वात् परस्परप्रतिबन्धादेकमपि वा न स्यादिति चेत्
केचित्पूर्वोक्तयुक्त्या लक्षणसंयोगत्व हेतुत्वे सिद्धे चाक्षुषादिवा
रणाः स्मरणादिप्रतिबन्धकत्वमनुभवानुरोधात् करणमेवेति
अन्ये तु सुषुप्तानुरोधात् चक्षुर्जन्यसंयोगत्व ज्ञानहेतुत्वं कल्प्यं
चाक्षुषादिप्रत्यक्षकाले लक्षणसंयोगाभावत्व स्मरणकाल
इति वदन्ति मनोग्राह्यं सुखं दुःखमिच्छाद्वेषौ प्रयत्नः इति
रिति मनोजन्यप्रत्यक्षविषयत्वं मनिर्ज्ञानं इतिः प्रकारः
एवं सुखत्वादिकमपि मनोग्राह्यं एवमात्मादि मनोग्राह्यं
किन्तु मनोमात्रत्व गोत्वत्वादिवत् पूर्वमनुभवात् चक्षुर्ग्रा
ह्यं यद्विर्विशेषणकं तद्भिन्नत्वे सति चक्षुःसंयोगा
वलक्षणं घटत्वाकारं घटत्वादिविशिष्टं ज्ञानं न जनयति
पूर्वं विशेषणत्व घटत्वादेर्ज्ञानेनाजनात् विशिष्टबुद्धौ विशेषण
ज्ञानत्व कारणत्वात् तत्त्वं च प्रकृतघटघटत्वयोर्भिन्नयो
रपि ज्ञानं जायते तद्वैकं निर्विकल्पकाख्यं तत्र न
प्रमात्वं तथाहि विकल्पजनकादिज्ञानत्व प्रमात्वं न भवति
घटत्वं जानामीति प्रमात्वात् तथाऽत्रापि ज्ञानं प्रकारी
भूय भासते ज्ञाने घटत्वत्व घटत्वं वः प्रकारः कश्चन विशेषण
विशेष्यभावे विशेषत्वं तद्विशेषत्वं तद्विशेषत्वाश्रयत्वेऽपि तु

ऽते विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञान
कारणं निर्विकल्पके च घटत्वादिकं न प्रकारतया घटत्वादि
विशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न सम्भवति घटत्वाद्यप्रका
रकं घटादिविशिष्टज्ञानं न सम्भवति आत्मातिरिक्तपदार्थ
ज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमात्। महत्त्वं द्विविधं
हेतुरिति द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणं द्रव्य
समवेतानां जातिगुणकर्मणां प्रत्यक्षे स्वाश्रयसमवायसम्ब
न्धेन कारणं द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वरूपत्वादीनां
प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणमिति। दृष्टि
त्वमिति यद्यपि द्विविधमिति अनुषज्यते दृष्टित्वन्तु न जातिः
पृथिवीत्वादिना सङ्कर्यप्रसङ्गात् किन्तु मध्येतरीभूतविशेषगु
णाश्रयत्वे सति ज्ञानकारणसंयोगाश्रयत्वं आत्मादिवा
रणाय तत्त्वं उद्भूतविशेषगुणत्वं मध्यस्थ श्रोत्रे यत्तात् मध्ये
तरेति विशेषगुणस्य रूपादेश्चक्षुषि यत्तात् उद्भूतेति उद्भूतत्वं न
जातिः शुक्लत्वादिना सङ्करात् न च शुक्लत्वादिव्याप्यं नानै
कमिति वाच्यं उद्भूतरूपत्वादिना चाक्षुषादौ अनेकतानुप
पत्तेः किन्तु शुक्लत्वादिव्याप्यमनुद्भूतत्वं नाना तदभावकूटत्वो
द्भूतत्वं तच्च संयोगादावपि तथाच मध्येतरीभूतगुणः संयोगा
दिश्चक्षुरादेरप्राप्तेर्विशेषेति कालादिवारणाय विशेषदर्शनं
दृष्टिर्यावयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वात्
दृष्टिर्यावत्त्ववारणाय कालादौ रूपाभावप्रत्यक्षे सन्निकर्ष
घटकतया कारणीभूतचक्षुःसंयोगाश्रयत्व कालादित्व

रत्वात् मनःपदं ज्ञानकरणमित्यपि तदारब्धाय कारणमिति
असाधारणं कारणं करणं असाधारणत्वं व्यापारवत्त्वं विषये
न्द्रियसन्निकर्षोव्यापारः सोऽपि षड्विधइति व्यापारः षन्निकर्षः
षड्विधं षन्निकर्षमुदाहरणद्वारा दर्शयति द्रव्यग्रहइति द्रव्य
प्रत्यक्षमिन्द्रियसंयोगजन्यं द्रव्यसमवेतप्रत्यक्षं इन्द्रियसंयुक्तसम
वायजन्यं एवमपेऽपि वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः
कारणं द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः द्रव्यसम
वेतसमवेतचाक्षुषं प्रति संयुक्तसमवेतसमवायः एवमन्यत्रापि
विन्न्यैव कार्य्यकारणभावः परन्तु परमाणुगीले नीलत्वं पृथि
वीपरमाणौ पृथिवीवृत्ति चक्षुषा कथंन गृह्यते तत्र परम्परया
उद्भूतरूपसमन्वयस्य महत्त्वसमन्वयस्य च विद्यमानत्वात् तथाहि
नीलत्वं जातिरेव घटनीले परमाणुनीले च वर्त्तते तथाच म
हत्त्वसमन्वीघटनीलमादाय वर्त्तते रूपसमन्वयद्वयमादाय
व वर्त्तते एवं पृथिवीवृत्ते घटादिकमादाय महत्त्वसमन्वयोवाच्यः
एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात् तस्मा
दुद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य द्रव्य
समवेतचाक्षुषप्रत्यक्षेतादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्य
समवेतसमवेतचाक्षुषे कारणत्वं वाच्यं इत्थञ्च परमाणुगीला
दौ न नीलत्वादिग्रहः परमाणुचक्षुःसंयोगस्य महत्त्वावच्छिन्न
त्वाभावात् एवं वाय्वादौ न सत्तादिचाक्षुषं तत्र चक्षुःसंयोगस्य
रूपावच्छिन्नत्वाभावात् एवं यत्र घटस्य मध्यावच्छेदेनाक्षी
संयोगः चक्षुःसंयोगस्तु वाह्यावच्छेदेन तत्र घटप्रत्यक्षाभावा

द्रव्यसमवेतसमवायः कारणं द्रव्यसमवेतसमवायः कारणं द्रव्यसमवेतसमवायः कारणं अथापि महत्त्वावच्छिन्नं प्रति मूर्त्तसंयोगावच्छिन्नत्वञ्च पूर्ववदेव बोध्यं एवं मनःप्रत्यक्षे ज्ञानसंयुक्तसमवायः मनःसमवेतत्वञ्च ज्ञानजन्यप्रत्यक्षे ज्ञानसंयुक्तसमवेतसमवायः कारणं। एवं रूपप्रत्यक्षे रसनासंयुक्तसमवायः रूपसमवेतत्वञ्च रसनप्रत्यक्षे रसनासंयुक्तसमवेतसमवायः कारणं शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणं क्व चर्म्म च प्रत्यक्षं लौकिकं बोध्यं वक्ष्यमाणमलौकिकं प्रत्यक्षं इन्द्रियसंयोगादिकं विनापि भवति एवमात्मनः प्रत्यक्षे मनःसंयोगः आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणं अभावप्रत्यक्षे समवायप्रत्यक्षे च इन्द्रियसन्निकर्षविशेषणता हेतुः वैशेषिकमते तु न समवायः प्रत्यक्षः क्व चद्यद्विशेषणता सप्तविधा तथाहि भूतलादौ घटाभावः संयुक्तविशेषणतया भूतले संख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया संख्यादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया ब्रह्मणि जीवसमवेतज्ञानावच्छिन्नविशेषणतया जीवे सुखाद्यभावः ज्ञानावच्छिन्नसमवेतविशेषणतया एवं ज्ञानावच्छिन्नाभावे सुखाभावादिकं विशेषणविशेषणतया एवं घटाभावादौ घटाद्यभावः संयुक्त

Digitized by Google

विशेषश्च विशेषज्ञानजन्यं स्मरणमनुभूतं तत्रापि विशेषज्ञानजन्य
त्वमेवैकमस्ति नास्ति चान्यथा गोत्वादावतिव्याप्तिरिति चार्षं प्रत्यक्षं
चाक्षुषमित्येति। यद्वि चाक्षुषत्वेन इति अभावप्रत्यक्षेऽतिव्याप्तु
मशक्तिः कारणं तथाहि भूतलादौ घटादिज्ञाने जाते घट
भावादिकं न ज्ञायते तेनाभावोपलब्धौ प्रतियोग्युपलब्धिभावः
कारणं तथापि योग्यतापेक्षितया सा च प्रतियोगिसमवायि
समवेतसमवेतत्वसम्बन्धेन तदर्थस्य प्रतियोगिनोघटादेः
ज्ञाने प्रकारतासम्बन्धावच्छिन्नविशेषणतासम्बन्धेन प्रतियोगी यस्य ज्ञानस्य
तादृशोऽभावप्रत्यक्षे हेतुः तथाहि यथालोकसंयोगादिकं वर्त
ते तत्र यत्र घटः स्यात् तर्हि उपलभेत इत्यापादयितुं श
क्यते तत्र घटाभावादिप्रत्यक्षं भवति अन्धकारे तु नापा
दयितुं शक्यतइति तेन घटाभावादेरन्धकारे चाक्षुषप्रत्यक्षं
न स्यादेवमप्रत्यक्षन्तु भवत्येव यालोकसंयोगं विनापि स्वाश्रय
समवेतत्वापादयितुं शक्यत्वात् गुरुत्वादिकं यद्योग्यं तदभा
वस्तु न तथाः तत्र गुरुत्वादिसमवेतत्वापादयितुमशक्यत्वात्
तत्रो ह्यपलब्धाः यानादौ तैरभावाभावः गुडे तिक्ताभावः शीते
स्पर्शाभावः आकाशे सुखाभावः। एवमादयस्तत्तदिन्द्रियैर्गृ
ह्यमाणे तत्तत्प्रत्यक्षत्वापादयितुं शक्यत्वात् संसर्गाभावप्रत्यक्षे
प्रतियोग्यनुयोग्यता अभावाभावप्रत्यक्षे तदधिकरणयोग्यता
ऽपेक्षिता अनुमानादौ पिण्डाद्यादिभेदोऽपि चक्षुषा गृह्यतएव
प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधं तत्र लौकिकप्रत्यक्षे लो
कालिकसन्निकर्षा वर्णिताः अलौकिकसन्निकर्षानिदानीं वदति अलौ

किमर्थमिति व्यापारः यत्सिद्धयर्थः सामान्यलक्षणेति सामान्यं लक्षणं यस्यार्थस्यार्थः तच्च लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपंप्रत्यासत्तिरित्यर्थोलभ्यते तचेन्द्रियसम्बद्ध विशेष्यकज्ञाने प्रकारीभूतं बोध्यं तथाहि यत्र इन्द्रियसंयुक्तो धूमादिः तद्विशेष्यकं धूमइति ज्ञानं जातं तत्र ज्ञाने धूमत्वं प्रकारः धूमत्वेन सन्निकर्षेण धूमइत्येवं रूपं सकलधूमविषयकं ज्ञानं जायते अत्र यदि इन्द्रियसम्बद्धमित्येवोच्यते तदा धूमी पटस्थे धूमसंभ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्यात् तत्र धूमत्वेन सह इन्द्रियसम्बन्धाभावात् मन्यते तु इन्द्रिय सम्बद्धं धूमीपटस्थं तद्विशेष्यकधूमइति ज्ञानं तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः इन्द्रियसम्बन्धोलौकिकोयावान् इदन्त्व बहिरिन्द्रियस्थले ज्ञानलक्षणे तु ज्ञानप्रकारीभूतसामान्यं ज्ञानंप्रत्यासत्तिः अतः मन्वादिना यत्किञ्चित् पित्राद्यानुपूर्व्या तौ ज्ञानस्य सकलपित्राद्यादिबोधजनकत्वं उपपद्यते परन्तु समानानां भावः सामान्यं तच्च क्वचिन्नित्यं धूमत्वादि क्वचिदनित्यं घटादि यत्रैकोघटः संयोगेन भूतले समवायेन कपाले ज्ञातस्तद नन्तरं सर्वेषामेव तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं भवति अत्रेदं बोध्यं सामान्यं येन सम्बन्धेन ज्ञायते तेन सम्बन्धेन अधिकरणानां प्रत्यासत्तिः किन्तु यत्र तद्घटज्ञा नानन्तरं तद्घटवतः स्मरणं जातं तत्र सामान्यलक्षणया सर्वेषां तद्घटवतां भानं न स्यात् सामान्यस्य तदानीमभावात् किन्तु इन्द्रियसम्बद्धविशेष्यकं घटइति ज्ञानं तत्र परदिने

इन्द्रियसम्बन्धं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य यस्मात् तादृशज्ञानं कुतोऽपि जायते तस्मात् सामान्यज्ञानं प्रत्यासत्तिर्न तु सामान्यमित्याह आसत्तिरित्यादि आसत्तिः प्रत्यासत्तिरित्यर्थः तथाच सामान्यलक्षणेत्यत्र लक्षणस्य विषयोऽर्थः तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्त्तते तत्र सकलघटादीनां चाक्षुषादिप्रत्यक्षं स्यादत आह तदिन्द्रियजन्यति अस्यार्थः यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जनयितव्यं तदा यत्किञ्चिद्दुर्निणि तस्य सामान्यस्य तदिन्द्रियजन्यज्ञानसामग्री अपेक्षिता सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकं तेनान्धकारादौ चक्षुरादिना तादृशज्ञानं न जायते ननु ज्ञानलक्षणाप्रत्यासत्तिर्यहि ज्ञानरूपा सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदेन सा दृतमाह विषयो यस्य तस्मिन् व्यापारो ज्ञानलक्षणेति सामान्यलक्षणा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्मिन् प्रत्यासत्तिरिति अथायमर्थः प्रत्यक्षे सन्निकर्षं विना ज्ञानं न सम्भवति तथाच सामान्यलक्षणां विना धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनाञ्च ज्ञानं कथं भवतु तदर्थं सामान्यलक्षणा स्वीक्रियेत तत्र सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यं प्रत्यक्षे धूमे वह्निसम्बन्धस्य गृहीतत्वात् अन्यधूमस्य चानुपस्थितेस्तद्धूमोवह्निव्याप्योऽयं नेति संशयानुपपत्तेः मन्यते तु सामा

न्यत्वजात्या सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीय धूमे वह्निव्याप्यत्वसंशयः संभवति तत्र सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेये ज्ञाते सर्व्वज्ञापत्तिरिति वाच्यं प्रमेयत्वेन सकलप्रमेये ज्ञातेऽपि विशिष्य सकलपदार्थानामज्ञातत्वेन सर्व्वज्ञाभावात् एवं ज्ञानलक्षणायास्वीकारे सुरभि चन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात् यद्यपि सामान्यलक्षणयापि सौरभभानं संभवति तथापि सौरभत्वस्य भानं ज्ञानलक्षणया एवं च धूमत्वेन धूमोपटलं ज्ञातं तत्र धूमीयपटलत्वानुव्यवसाये भानं ज्ञानलक्षणया। योगजोधर्म्मविधरिति योगाभ्यासजनितोधर्म्मविशेषः मुनिपुराणादिप्रमाणकरत्वर्थः युक्तयुञ्जानभेदतइति युक्तयुञ्जानरूपयोगिदैविध्याद्धर्म्मस्यापि दैविध्यमिति भावः युक्तस्य सर्व्वदाभानमिति योगाभ्यासवशीकृतमानसः समाधिसमासादितविविधविभूतिर्युक्तरत्युच्यते अयमेव विशिष्टयोगवत्त्वात् विद्युक्तरत्युच्यतेसर्व्वदेति चिन्ता सहकारिणं विनेत्यर्थः भानं सर्व्वविषयाणां प्रत्यक्षं अपरो युञ्जानः विषयव्याकृतमानसः चिन्ता भानंमनसः तदेकाग्री करणं तत्सहकारात् खूलसूक्ष्माद्यवहितविप्रकृष्टानर्थान् प्रत्यक्षीकरोतीत्यर्थः अनुमितिं व्युत्पादयति व्यापारयतीति अनुमायां अनुमितौ व्याप्तिज्ञानं करणं परामर्शोव्यापारः तथाहि येन पुरुषेण महानसादौ धूमे वह्नेर्व्याप्तिर्गृहीता पश्चात् सएव पुरुषः कुत्रचित् पर्व्वतादौ अविच्छिन्नधूमां धूमलेखां पश्यति तदनन्तरं धूमो वह्निव्याप्यइत्येवंरूपं व्याप्तिस्मरणं भवति तस्मा

च वह्निव्याप्यधूमवानयमिति ज्ञानं भवति सएव परामर्शइत्यु
च्यते तदनन्तरं पर्व्वतोऽयं वह्निमानिति ज्ञानं जायते तदेवानु
मितिः अत्र प्राचीनास्तु व्याप्यत्वेन ज्ञायमानं धूमादिकमनुमिति
करणं तद्दूषयति ज्ञायमानमिति लिङ्गस्यानुमित्यकरणत्वं
युक्तिमाह अनागतादीति यद्यनुमितौ लिङ्गं करणं स्यात् तदा
अनागतेन विनष्टेन वा लिङ्गेन अनुमितिर्न स्यात् अनुमिति
करणस्य लिङ्गस्य तदानीमभावात् व्याप्यस्य पक्षधर्म्मत्वबो
धेति व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनु
मितिजनकं तच्च व्याप्यः पक्षे इति ज्ञानं पक्षोव्याप्यवानिति
ज्ञानञ्चा अनुमितिस्तु पक्षे व्याप्यइति ज्ञानात् पक्षे साध्यं इत्या
कारिका पक्षोव्याप्यवानिति ज्ञानात् पक्षः साध्यवानित्याकारि
का द्विविधादपि परामर्शात् पक्षः साध्यवानित्येवानुमितिरि
त्यन्ये ननु वह्निव्याप्यधूमवान् पर्व्वतइति ज्ञानं विनापि यत्र
पर्व्वतोधूमवानिति प्रत्यक्षं ततोधूमोवह्निव्याप्यइति स्मरणं
भवति तच्च ज्ञानद्वयादनुमितिरित्यनेन व्याप्तिविशिष्टवैशिष्ट्या
वगाहिज्ञानं सर्व्वत्र न कारणं किन्तु व्याप्यतावच्छेदकप्रकारक
पक्षधर्म्मताज्ञानत्वेन कारणत्वं आवश्यकत्वात् विशिष्टवैशिष्ट्य
ज्ञानकल्पने गौरवाच्चेति चेन्न व्याप्यतावच्छेदकाज्ञानेऽपि
वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेः लाघवाच्च व्याप्तिप्रका
रकपक्षधर्म्मताज्ञानत्वेनैव कारणत्वं किञ्च धूमवान् पर्व्वतइति
ज्ञानादनुमित्यापत्तिः व्याप्यतावच्छेदकीभूतधूमत्वप्रकारक
पक्षधर्म्मताज्ञानस्य सत्त्वात् न च तदानीं वह्नित्वव्याप्यताव

च्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वमिति वाच्यं तेनैव व्याप्तिग्रहे तेनैव पक्षधर्मताज्ञानादनुमितिः स्यादिति। यदि तु तत्पुरुषीयवृत्त्यभावत्वाच्छेदकप्रकारकतत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरुच्यते तदा अनन्यकार्यकारणभावः मन्यते तु समवायेन व्याप्तिप्रकारक पक्षधर्मताज्ञानं समवायेनानुमितिं जनयतीत्यर्थे नानन्यकार्य कारणभावः यदि तु व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानस्य सतन्त्रं कारणमित्युच्यते तदा कार्यकारणभावद्वयं वह्नित्या योधूम आलोकवान् पर्वतइति ज्ञानादप्यनुमितिः स्यादिति दूषणस्य च ज्ञानद्वयं तत्रापि विनिगन्तृज्ञानं कल्पनीयं फलमु खगौरवस्यादोषत्वात् इति व्याप्योनामव्याप्त्याश्रयः तच्च का व्याप्तिरित्यतआह व्याप्तिरिति साध्यवदन्येति वह्निमान् धूमा दित्यादौ साध्यं वह्निः साध्यवान् महानसादिः तदन्योजल ह्रदादिः तदवृत्तिलं धूमस्येति लक्षणसमन्वयः धूमवान् वह्ने रित्यादौ साध्यवदन्यसिन्नयःपिण्डादौ वह्निसत्त्वात्नातिव्याप्तिः अत्र येन सम्बन्धेन साध्यं तेनैव सम्बन्धेन साध्यवान् बोध्यः अन्य था समवायसम्बन्धेन वह्निमान् वह्नेरवयवः तदन्योमहानसा दिः तत्र धूमस्य विद्यमानत्वात् अव्याप्तिप्रसङ्गात् साध्यवदन्यस्य साध्यवत्तावच्छेदकप्रतियोगिताकभेदवान् बोध्यः तेन यद्धि न्नदवह्निमान् महानसादिस्तद्भिन्ने पर्वतादौ धूमस्य सत्त्वेऽपि न क्षतिः येन सम्बन्धेन हेतुस्तेन सम्बन्धेन साध्यवदन्यवृत्तिलं बोध्यं तेन साध्यवदन्यस्मिन् धूमावयवे धूमस्य समवायसम्ब

[illegible] साध्यवद्भिन्नत्वं साध्यवद्भेदस्य साध्यवद्भिन्नाभावः तेन धूमवान् वह्नेरित्यत्र साध्यवद्भेदाधिकरणे हृदादौ वह्न्यभावेऽपि नातिव्याप्तिः। अथ यद्यपि हृदं गुरुत्वाभावविशिष्टं तथापि गुरुत्वाभावविशिष्टाभावाः कपालादौ साध्यवद्भिन्नत्वं गुणादावतिव्याप्तिं नावहतीति तथापि हेतुतावच्छेदकरूपेणातिव्याप्तिं वारयितुं हेतुतावच्छेदकं तद्धर्मकत्वं तद्भेदकमिति पक्षितार्थं वदन् हेतुतावच्छिन्नोद्देश्यतादौ साध्यवद्भेदाप्रसिद्ध्यापत्तिः विशेषणात् जातित्वादेः साध्यवद्भिन्नत्वं सामान्यादौ हेतुतावच्छेदकसमानयोग क्षेमाभावेन तद्भेदप्रसिद्ध्यापत्तिवारणाय वदन् हेतुतावच्छेदकं हेतुतावच्छेदकमिति हेतुतावच्छेदकनिष्ठा तत्तद्विरहाभावः तद्धर्मकत्वं हेतुतावच्छेदकतत्तद्धर्मयोऽभावः तद्भेदप्रतियोगिना साध्येन सह हेतोः साध्याधिकरणवृत्तित्वं व्याप्तिः यद्यपि वह्नित्वात् धूमवत्त्वादौ हेतुतावच्छेदकधर्मस्य तद्भेदप्रतियोगित्वं तत्तद्व्यक्तेरेवास्ति व्याप्तिः च च सकलसाध्याधिकरणवृत्तिधूमत्वेनैव व्याप्तिरिति वक्ष्यते रघुभट्टभावकलाहेऽप्यनेनैव हृदं गुरुत्वाभावविशिष्टं गुरुत्वाद्यभावत्वात् कपालादिवदिति प्रतीतेः गुरुत्वाद्यभावत्वेन व्याप्तेश्च तथापि साध्यतावच्छेदकं प्रतियोगितावच्छेदकं तद्वच्छिन्नसाध्याधिकरणं व्याप्तिरिति वाच्यं वह्नेरुपलक्षणत्वात् प्रथिवीत्वादिव्याप्तौ साध्यतावच्छेदकावच्छिन्नाभावाप्रसिद्ध्यापत्तेश्च साध्याधिकरणवृत्तिगुणत्वाद्यभावप्रतियोगितावच्छेदकतावच्छिन्नाव्याप्तिरिति तेन तत्र परम्परया रूपलक्षणत्वात्तिमत्त्वेन

साध्यतावच्छेदकत्वात् नहि तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्यामस्ति कृपलक्षणाभावजातिमान् नास्तीति बुद्ध्यापत्तेः साध्या हिभेदेन व्याप्तेर्भेदात् तादृशस्यैव साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमित्येव लक्षणघटकमित्थं निवेश्यते एवं दण्डादौ साध्ये परम्परासम्बन्धं दण्डत्वादिकमेव साध्यतावच्छेदकं प्रतियोगितानवच्छेदकमिति वाच्यं ऐलधिकरणत्व ऐतुतावच्छेदकनिष्ठाधिकरणं वाच्यं तेन कृष्णं गुरुकर्मान्यत्वनिष्ठनिरूपकत्वात् दण्डादौ गुरुत्वाधिकरणगुणादिनिष्ठाभावप्रतियोगिन्यपि कृष्णत्वे नाव्याप्तिः ऐतुतावच्छेदकसम्बन्धेन ऐलधिकरणं योज्यं तेन समवायेन मूलावच्छिन्नाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेऽपि वह्नेर्नाव्याप्तिः अभावस्य प्रतियोगित्वधिकरणोक्तेः तेन कपिसंयोगी एतद्वृक्षत्वादित्यादौ मूलावच्छेदेनैव एतद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेऽपि संयोगस्य नाव्याप्तिः न च प्रतियोगित्वधिकरणत्वं प्रतियोग्यनधिकरणवृत्तित्वं तदा तत्रैवाव्याप्तिः प्रतियोगिनः कपिसंयोगसमानाधिकरणगुणादौ वर्त्तते योऽभावस्तत्रैव मूलावच्छेदेन वर्त्तमात् यदि प्रतियोग्यधिकरणावृत्तित्वं तदा संयोगित्वादित्यादावतिव्याप्तिः वस्त्वाधिकरणे गुणादौ यः संयोगाभावस्तत्र प्रतियोग्यधिकरणद्रव्यवृत्तित्वाभावेति वाच्यं ऐलधिकरणे प्रतियोग्यनधिकरणवृत्तित्वनिरूपितत्व विवक्षितत्वात् स्वप्रतियोग्यनधिकरणीभूतैलधिकरणवृत्त्यभाववानित्यर्थः प्रतियोग्यनधिकरणे स्वप्रतियोगितावच्छेदकसम्बन्धे

प्रतियोगितावच्छेदकावच्छिन्नाधिकरणं योऽयं तेन विशिष्ट
ज्ञानवान् आत्मेत्यादौ आत्माधिकरणगुणादौ विशिष्टवैशि
ष्टयसम्बन्धेन प्रतियोग्यसमानाधिकरणत्वेऽपि न क्षतिः एवं साध्यता
वच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं योऽयं तेन ज्ञानवान्
आत्मादित्यादौ स्वसमानाधिकरणघटादेर्विषयतासम्बन्धेन ज्ञाना
धिकरणत्वेऽपि न क्षतिः इत्यत्र वह्निमान् धूमादित्यादौ धूमा
धिकरणे समवायेन वह्निविरहत्वेऽपि न क्षतिः ननु प्रतियोगि
तावच्छेदकावच्छिन्नस्य यस्य कस्यचित् तत्सामान्यस्य वा अनधि
करणत्वं यद्विशिष्यप्रतियोगितावच्छेदकावच्छिन्नस्य वाऽनधिक
रणत्वमुक्तं भावे व्यभिचारी इतरेतराश्रयादित्याद्यापत्तिः।
व्यभिचाराभावस्य हि प्रतियोगितावच्छेदकावच्छिन्नाधिकर
णनिरूपितत्वे व्यभिचारोऽभावति तदनधिकरणत्वस्य स्वरूपतो दुर्नि
र्वचे प्रतियोग्यधिकरणाभावापत्तिः. वर्मत्वाभावस्य
पूर्णवस्तुनिष्ठविशिष्टाभावात्मकप्रतियोग्यसमानाधिकर
णत्वात् न च वह्निमान् धूमादित्यादौ घटाभावादेः पूर्णवस्तु
निष्ठविशिष्टाभावात्मकप्रतियोग्यधिकरणत्वं यद्यपि वर्मा
देः तथापि साध्यतावच्छेदकसम्बन्धेन तत्प्रतियोग्यसमानाधिक
रणवृत्तित्वमक्षतमेवेति कथमप्रसिद्धिरिति वाच्यं घटाभावे
योग्यभावस्य घटाभावात्मकतया घटाभावस्य वह्निरपि
प्रतियोगी तदधिकरणत्वं पर्वतादेरिति भ्रमेण प्रतियोग्यधि
करणत्वस्याप्रसिद्धत्वात्. नहि च घटाभावादौ वह्न्यभावादि
र्भ्रमोदयमुच्यते तथापि धूमाभाववान् वह्न्यभावादित्याद्यव

व्याप्तिः तच्च साध्यतावच्छेदकसम्बन्धः स्वरूपसम्बन्धः तेन सम्बन्धेन सर्वधीवाभावस्य च दुर्भरत्वनिरूपितविशिष्टाभावस्य प्रतियोग्यधिकरणत्वं हेत्वधिकरणत्वेति तृतीये तु कपिसंयोगाभाववान् आत्मत्वादित्यादावव्याप्तिः तत्राद्यनिरूपितविशेषणाभावाभावः कपिसंयोगः तच्च च गुरुत्वाद्यप्रतियोगिता वच्छेदकं गुरुत्वाद्याश्रयत्वमपि तद्वच्छिन्नाधिकरणत्वं हेत्वधिकरणत्वादिति तदेवं साध्यप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वं हेतुसमानाधिकरणप्रतियोगितावच्छेदकसम्बन्धनिरूपितत्वात् ननु काणोऽयवान् काणत्वन्यायात् द्रव्यत्वाव्याप्तिः प्रतियोग्यधिकरणाभावाप्रसिद्धेः हेत्वधिकरणं तच्च महाकालत्वं जगदाधारतया सर्वेषामभावानां साध्यतावच्छेदकसम्बन्धेन कालिकविशेषणतया प्रतियोग्यधिकरणत्वात् अथ वेत् महाकालभेदविशिष्टघटाभावस्य च प्रतियोग्यधिकरणं महाकालस्य घटाभावत्वेऽपि महाकालभेदविशिष्टघटाधारत्वात् महाकाले महाकालभेदाभावात् वस्तुतस्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणो मूलहेत्वधिकरणत्वाभावप्रतियोगितासामान्ये सम्बन्धाव च्छिन्नतद्दुर्भावच्छिन्नोभयाभावत्वेन सम्बन्धेन तद्दुर्भावच्छि न्नत्वं तच्च हेतुव्यापकत्वं बोध्यं व्यापकत्वमाधाराधिकरणत्वं व्याप्तिः यत्सम्बन्धः साध्यतावच्छेदकसम्बन्धः यद्धर्मः साध्यता वच्छेदकं तच्च यदि यद्धर्मावच्छिन्नाभावमात्रमित्युच्यते तदा समवायेन जीवत्वाभावस्य च प्रतियोगितावच्छेदकसम्बन्धः

तच्च न पक्षता सिषाधयिषाविरहविशिष्टसिद्धेः संभवात् नापि परामर्शजन्यं सिद्धिरूपतः सिषाधयिषा तच्च सिषाधयिषाकाले परामर्शजन्याज्ञानानुमितिः यच्च सिद्धिपरामर्शसिषाधयिषाः क्रमेण भवन्ति तच्च सिषाधयिषाकाले सिद्धेर्ज्ञानात् प्रतिबन्धकाभावादेवानुमितिः यच्च सिषाधयिषासिद्धिपरामर्शाः सन्ति तच्च परामर्शकाले सिषाधयिषैव नास्ति इत्यन्यच्चापि सिद्धिकाले परामर्शकालेन सिषाधयिषाकालस्यातिभिन्नत्वेन वस्तुतानां वैलक्षण्यनियमात् कथं सिषाधयिषाविरहविशिष्टं सिद्धेर्ज्ञानमिति चेन्न यच्च वह्निव्याप्यधूमवान् पर्वतोऽयं वह्निमानित्यनुमितिः सुखसाधनमिति प्रत्यक्षं स्मरणं वा ततः सिषाधयिषा तच्च पक्षतावच्छेदके सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वावश्यकत्वादिति अत्रेदं बोध्यं यादृशयादृशसिषाधयिषायाश्चे सिद्धिरूपे यस्मिन्कालानुमितिस्तादृशसिषाधयिषाविरहविशिष्टसिद्धिज्ञानकालानुमितौ पक्षता नेन सिद्धिपरामर्शस्थेऽपि यद्विह्नित् ज्ञानं जायतामितीच्छायामपि नानुमितिः वह्निव्याप्यधूमवान् पर्वतोऽयं वह्निमानिति प्रत्यक्षस्थे प्रत्यक्षादिजन्यं वह्निज्ञानं जायतामितीच्छायान्तु भवत्येव एवं धूमपरामर्शस्थे आलोकेन वह्निमनुमिनोमीतीच्छायामपि नानुमितिः सिषाधयिषाविरहकाले यादृशसिद्धिरूपे नानुमितिर्यादृशी सिद्धिर्विशिष्य तत्तदनुमितिप्रतिबन्धिका वक्तव्या तेन पर्वतस्तेजस्वी यावद्वह्नेरयं वह्निमानिति ज्ञानस्थलेऽप्यनुमितेर्न विरोधः परन्तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धा

[illegible] प्रति पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति पक्षतावच्छेदकावच्छेदेन सिद्धिरेव प्रतिबन्धिका पक्षतावच्छेदकप्रकारकाधिकरणीयानुमितिं प्रति तु सिद्धिसामान्यं विरोधि इदन्तु बोध्यं यत्र पुरुषीय इति यंत्रकालानन्तरं यत्र पुरुषव्यावृत्तकरादिमानयं इति ज्ञानं तत्रायत्नानुमितावां पुरुषजन्यत्व प्रत्यक्षं भवति तत्रानुमितिरेतेऽनुमितात्मिका इच्छाविशिष्टविषयकप्रत्यक्षजन्या कामिनीच्छिन्नादिवद् ज्ञान त्वेव प्रतिबन्धिका एवं परामर्शानन्तरं विनापि प्रत्यक्षेच्छां यत्राहितप्रत्यक्षानुत्पत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिधामपि लिङ्गविषयकप्रत्यक्षे प्रतिबन्धिका। प्रत्यक्षत्वञ्चात्रा हेत्वाभासान् विभजते यत्रैकावयवत्वादि तत्रत्वन्तु लिङ्गविषयकत्वेन ज्ञानत्वानुमितिविरोधित्वं तत्त्वं तथाहि व्यभिचारादिविषयकत्वेन ज्ञानत्वानुमितिविरोधित्वात्तौ हेत्वाः लिङ्गविषयकत्वञ्च या दृग्विशिष्टविषयकं बोधं तेन बाधभ्रमत्वानुमितिविरोधित्वेऽपि तत्र पर्वतोवह्निमत्त्ववत्त्वमिति विशिष्टज्ञानसिद्धत्वात्र हेतु हेत्वाः न च वह्न्यभावव्याप्यधूमवत्त्वबलवान् पर्वतादिपरामर्शकाले वह्निव्याप्यधूमवत्ताभावत्वं न ज्ञात् तत्र वह्न्यभावव्याप्यवान् पवतीति विशिष्टज्ञानसिद्धत्वादिति वाच्यं दृष्टापत्तेः अन्यथा बाधभ्रमत्वानुमितिविरोधित्वापत्तेः तत्त्वात्तत्र वह्न्यभावव्याप्यधूमवत्ताभावत्वं बलवान् इति परामर्शकाले वह्निव्याप्यधूमवत्ताभावत्वं ज्ञानाभावत्वं भ्रमादनुमितिप्रतिबन्धकत्वं हेतुत्वं न दुष्टं इति दृष्टत्वञ्च यावदभावदूषितहेत्वादिकं हेतोः लक्षणा च

हेतौ चेत्र कैमापि समत्वेनेति भावः परे तु प्रतिबन्धकत्वेन ज्ञानस्यानुमितिविरोधित्वं तदभावं हेत्वाभासत्वं वदन्तिपक्षे विरोधित्वाद्यादिकमेव तथा तदभावं हेत्वाभासत्वमेव सत्येवं वह्निमान् धूमादित्यादौ बाधभ्रमे पक्षे साध्याभाव विषयकत्वेनानुमितिविरोधित्वात् ज्ञानरूपसमत्वेन तदभाव त्वापि वस्तुतः यद्वेतोरपि बाधितत्वापत्तिरिति वाच्यं तत्र ज्ञानस्य समत्वमात्रकथनात् न च बलवत्प्रतिबन्धकत्वमेव तत्रकथनात् न च बाधितत्वव्यवहाराभावप्रसङ्गः। वस्तु मितिविरोधित्वस्य अनुमितिसामान्यकारणत्वविरोधित्वं तेन हत्वंशे व्यभिचारभ्रमे हेत्वन्तरेणानुमितिमुत्पद्यते तदभाव वत्वमात्रेण व्यभिचारज्ञानस्यानुमितिविरोधित्वाभावे ऽपि न क्षतिरिति संक्षेपः। बाहुल्यपक्षाश्रयेण बाधस्यो दोषत्वादन्यान्यत्वं न च हेत्वाभासत्वं पक्षधर्मतायां तु तथा व्यवहाराभिप्रायेण एवं साधारणत्वाद्यवच्छेदकं अनैकान्तिकत्वं आदिः साधारणवदित्यादि साधारणः साधारणवदन्यवृत्तिर्हि तुः तेन च व्याप्तिपक्षधर्मतावन्यः लिङ्गे असाधारणः साध्याभावाधिकरणो हेतुः तेन साध्याभावाधिकरणत्वं प्रतिबन्धं यते यथा अग्नेनित्यः शब्दत्वादित्यादौ साधारणं शब्दे ऽनित्यः शब्दत्वादित्यादौ असाधारणश्चायं यत्रे तु सपक्षव्या पिरसाधारणः सपक्षस्य निश्चितसाध्यवत्त्वं तत्रत्व शब्दे ऽनित्यः शब्दत्वादित्यादौ पक्षे यथा साध्यनिश्चयः तदा च साधारणं तत्र हेतुनिश्चयादिति वदन्ति अनुपसंहारी च

[illegible] प्रतिबन्धः किन्तु साध्याभावीभूताभावप्रतियोगी
[illegible] साध्याभावव्यधिकरणमेव प्रतिबन्धकः सत्प्रतिपक्षे तु
प्रतिहेतुः साध्याभावसाधकः अत्र तु हेतुरेवेति विशेषः साध्या
भावसाधकत्वं साध्यसाधकत्वेन उपस्थितत्वं प्रतिविशेषो
पसापकत्वाच्च विशेषः सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः
अगृहीताप्रामाण्यकसाध्यव्याप्यत्वसंसर्गावच्छिन्नप्रतियोगिकसाध्याभा
वव्याप्यत्वसंसर्गावच्छिन्नविषयस्तथा दृष्टान्ते अत्र च परस्परामाव
साध्यवत्ताज्ञानात् परस्परानुमितिप्रतिबन्धः फलं अत्र कश्चित्
यथा घटाभावव्याप्यवत्ता ज्ञाने विद्यमानेऽपि घटचक्षुःसंयोगे
सति घटवत्ताज्ञानं जायते यद्वा च सत्यपि पीतत्वाभावबाधे
शङ्खत्ववत्ताज्ञाने पित्तादिदोषे पीतः शङ्ख इति धीर्जायते एवं
कोटिद्वयव्याप्यवत्ताद्वये कोटिद्वयप्रत्यक्षरूपः संशयो जायते
तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवत्येव अत्र कस्यचि
त्कोट्याग्रहेण तत्राधिकबलतया द्वितीयकोटिभानप्रतिबन्धात्च
संशयः। फलबलेन चाधिकसमबलभावः कल्प्यतइति यद्यपि
तत्र तद्भावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषग्राह्य
बोधादेरनुदयात् लौकिकसन्निकर्षजन्यदोषविशेषाजन्यत्वाच्च
भावे तत्र प्रतिबन्धकता लाघवात् तदुपनीतभानविशेषे ग्राह्य
बोधे च पृथक्प्रतिबन्धकता गौरवात् तथाच प्रतिबन्धकबलात्
कथमनुमितिः न हि लौकिकसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रति
पक्षस्थले संशयानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापि

निश्चयोत्थं यच्च कोटिद्वयव्याप्यवत्ताज्ञानं तयोरभयव्याप्यत्वज्ञानात् संशयोत्तरभावी अगृहीतग्राह्यत्वात्तस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति आश्रयासिद्ध्याद्यन्यतमत्वं फलं हेतुः आश्रयासिद्धिः पक्षे पक्षतावच्छेदकाभावः यच्च काञ्चनमयः पर्वतोवह्निमानिति साध्यते तच्च पर्वतोन काञ्चनमयइतिज्ञाने विद्यमाने काञ्चनमयपर्वते परामर्शप्रतिबन्धः फलं स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतत्वाभावः यच्च द्रव्यं धूमादित्यादौ पक्षे व्याप्यत्वाभिमतत्वं हेतोरभावे ज्ञाते पक्षे साध्यव्याप्यहेतुमत्ताज्ञानरूपपरामर्शप्रतिबन्धः फलं साध्यासिद्धिरपि व्याप्यत्वासिद्धिः सा च साध्ये साध्यतावच्छेदकाभावः तथाच काञ्चनमयवह्निमानित्यादौ साध्ये साध्यतावच्छेदकाभावे ज्ञाते साध्यतावच्छेदकविशिष्टसाध्यवत्ताज्ञानरूपपरामर्शप्रतिबन्धः फलं एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः यथाच काञ्चनमयधूमादित्यादौ हेतुतावच्छेदकविशिष्टहेतोर्ज्ञानाभावात् तत्तद्धेतुकव्याप्तिज्ञानादेरभावः फलं एवं वह्निमान् नीलधूमादित्यादौ गुरुतया नीलधूमत्वं हेतुतावच्छेदकमिति व्याप्यत्वासिद्धिरित्यपि बोध्यं साधस्तु पक्षे साध्याभावादिः एतस्यानुमितिप्रतिबन्धः फलं तद्धर्मिकतदभावनिश्चयोलौकिकसन्निकर्षाद्व्यवहारविशेषाद्यन्यतद्धर्मिकतज्ज्ञानमात्रे विरोधीति नतु तत्र संशयसाधारणं पक्षे साध्यसंदेहज्ञानं अनुमितिकारणं तद्विरोधित्वात् साधकप्रतिपक्षयोर्हेत्वाभासत्वमिति युक्तं तु

विद्याभिमतरजेर्हेत्वाद्यानुमित्यनापत्तेः पूर्वं पक्षे संशय संसृष्टलक्षणाभावात् अप्रसिद्धसाध्यकानुमित्यवलापापत्तेः साध्यसंशये विनानुमित्युत्पत्तेश्च एवं साध्याभावज्ञाने प्रमात्व ज्ञानमपि न प्रतिबन्धकं प्रमाणाभावात् गौरवाच्च अन्यथा यत्प्रतिपक्षादावपि तदभावव्याप्यवत्ताज्ञाने प्रमाणविषयत्वेन प्रतिबन्धकतापत्तेः किन्तु भ्रमत्वज्ञानानाक्षिप्तबाधादिबुद्धेः प्रतिबन्धकता तत्र भ्रमत्वप्रकारविघटने प्रामाण्यज्ञानं क्वचि दुपयुज्यते तत्र बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः पक्षे हेत्व भावे स्वरूपासिद्धिरेव हीयतेति वाच्यं बाधज्ञानव्यभिचारं ज्ञानादेर्भेदात् किञ्च यदा परामर्शानन्तरं बाधबुद्धिस्तत्र व भिचारज्ञानादेरविशिष्टकारणत्वात् बाधज्ञानमुत्तरं प्रतिबन्धकतं वाच्यं एवं यत्रोत्पत्तिमत्त्वावच्छिन्ने घटादौ गन्धिमत्पृथिवी त्वज्ञानं तत्र बाधस्यैव प्रतिबन्धकतं वाच्यं न च घटे गन्धवत्त्वात् कथं बाधइति वाच्यं पक्षतावच्छेदकदेशकालावच्छेदेनानुमि तेरनुभवसिद्धत्वादिति यत्प्रतिपक्षतज्ज्ञानयोर्मिथो हेत्वाभास यत्वाद्यः स तत्त्वज्ञानएवानर्थभवति अन्यथा हेत्वाभासाधिक्यप्रस ङ्गात् बाधज्ञानयत्प्रतिपक्षमिश्रएव ज्ञानत्वेऽपेक्षे मुनिना पृथगु पादानात् यत्प्रतिपक्षज्ञानन्तु न प्रतिबन्धकमिति प्रकटितार्थः यः यत्रैविपक्षे च भवेत् साधारणस्तु सइति यत्पक्षविपक्षवृत्तिः साधारणस्तदर्थः यत्रः सध्यवान् विपक्षः साध्याभाववान् विरुद्धत्वाच्च यत्पक्षवृत्तित्वमुक्तं यस्तोविपक्षवृत्तिस्तत्रैव वाच्यं विरुद्धस्य साधारणस्यापि दूषकता बीजस्य भिन्नत्वा तस्य

सर्वसम्बन्धात् पक्षधर्मत्वात् व्याप्तेः साध्यसत्त्वारोपेतरत्वं
पक्षविपक्षव्यावृत्तत्वार्थः पक्षः साध्यवत्तया निश्चितः विप
क्षः साध्याभाववत्तया निश्चितः ह्रदोभिन्नः ह्रदत्वादिमत्त्वादौ यद्य
ह्रदेऽवित्वव्यक्तेरभावात् पक्षत्वं विपक्षत्वञ्च घटत्वादीनामेव
तद्व्यक्तेस्तु ह्रदत्वमिति तदा व्यर्थविशेषणं यदा तु
ह्रदे विद्वत्त्वनिश्चयः तदा बाधाभावः दृढस्तु प्राचां मतेन
यदीयत्वं पूर्वमुक्तं केवलान्वयिपक्षकरति केवलान्वयिधर्मान
विच्छेदकत्वार्थः सर्वमभिधेयं प्रमेयत्वादौ सर्वस्यैव
पक्षत्वात् सामानाधिकरण्यघटकसामानाधिकरण्याभावाप्रसिद्धिः
दृढस्तु न सम्यक् पक्षैकदेशे घटत्वादिरूपेऽपि व्यापेरभावात्
अत्र च यद्यपि साध्यवत्तापि अनुमितिरूपाविच्छिन्नैव नतु
केवलाभासं तस्य तथापि केवलान्वयिसाध्यकं तत्त्वमित्यनुमि
तेः साध्यवतीति एवकारेण साध्यसमानाधिकरणेन केवलाभावोपो
धितः तथाच साध्यव्यापकीभूतसाध्यसमानाधिकरणाभावोपधितं तदर्थः।
वह्निर्द्रव्यं विभजते आग्नेयत्रिविधिरित्यादि पक्षत्रिविधिरिति आ
ग्नेयत्रिविधिरित्यर्थः। नीलधूमादिकमिति नीलधूमत्वं गुरुत्वा
न हेतुतावच्छेदकं यत्सामानाधिकरण्यव्याप्यतावच्छेदकधर्मा
रावटितत्वेव व्याप्यतावच्छेदकत्वात् धूमप्रागभावासंसर्गाव
च्छिन्नाधिकरणेति विद्वत्त्वेतरेति व्यधिकरणभावस्याप्य
न्यतरत्वेऽपि न तत्प्रतियोगितासम्बन्धावच्छिन्नं विद्वत्त्वेतरेति
तथाच स्वाश्रयविद्वत्त्वसाध्याभावाधिकरणपरामर्शजन्यानु
व्यवसायपरामर्शविषयत्वार्थः। साध्यशून्यवृत्ति पक्षः पर्व

लक्षणीयैकनिष्ठत्वरूपः तेन घटे नष्टेऽपि न क्षतिः इदं मूलावच्छेदेन कपिसंयोगी आसीत् इति बोधं। उपमितिं लुप्तादृष्टेति यमीक्षितेति यथाश्रुतेन केनचित् वाक्येन प्रति गोसदृशो गवयपदवाच्य इति पश्चात् वाक्येन कश्चि दरण्येऽवयोऽदृष्टस्य गोसादृश्यज्ञानं यत् उपमितिकरणं तदनन्तरं गोसदृशो गवयपदवाच्यो रत्यतिदेशवाक्यार्थस्म रणं जायते तदेव व्यापारः तदनन्तरं तत्र गवयो गवयपद वाच्य इत्यर्थस्य ज्ञानं जायते सदुपमितिः नन्वयं गवयपदवाच्य इत्युपमितिः गवयान्तरे प्रक्रियाभावप्रसङ्गात्। शाब्द बोधप्रकारं दर्शयति पदज्ञानमिति नतु शाक्यमानं पदं कारणं पदाभावेऽपि मौनिनोकादौ शाब्दबोधात् पदार्थधीरिति पदजन्यपदार्थस्मरणं व्यापारः अन्यथा पदज्ञानवतः प्रत्यक्षा दिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः तत्रापि कृत्वा पदजन्यं बोधं अन्यथा घटादिपदात् तत्तत्पदघटत्वेन घटाद्यस्मरणं आयते शाब्दबोधापत्तेः वृत्तिः प्रक्रियाज्ञानान्यतरः तत्तत्पदः शक्तेव प्रक्रियाज्ञानस्य उपयोगः पूर्वं प्रक्रियाभावे पदज्ञानेऽपि तत्तत्पदेन स्मरणानुपपत्तेः पदज्ञानस्य यत्प्रक्रियाज्ञानविषयार्थस्मारकत्वं प्रक्रिया पदेन यद्द पदार्थेन तत्तत्पदः अस्माच्छब्दादयमर्थोबोद्धव्यस्तीश्वरे च्छारूपा आधुनिकी नाम प्रक्रियैव एकादशेऽहनि पिता नाम वुध्यते ईतीश्वरेच्छायाः कल्पात् आधुनिके तु यद्धेते न प्रक्रियेति तत्तदर्थः तच्चास्तु ईश्वरेच्छा न प्रक्रियः किन्तु

श्चैव तेन आधुनिकसङ्केतेऽपि प्रक्रियेति वदन्ति प्रक्रियाया व्याकरणादितः तथाहि प्रक्रियाहं व्याकरणोपमानकोषाप्त वाक्याप्तव्यवहारत्वम्। वाक्यस्य चैवादिदृतेर्वदन्ति साक्षिणतः सिद्धपदस्य वृद्धाः। धातुप्रकृतिप्रत्ययादीनां प्रक्रियाहोव्याकर णाद्भवति क्वचित्तु यति बाधके त्यज्यतेऽपि यथा वैयाकरणै राख्यातस्य कर्त्तरि प्रक्रियते चैवः पचतीत्यादौ कर्मणि चैवस्याभेदान्वयस्यच गौरवान्न जन्यते किन्तु कृतौ प्रक्रियाहो लाघवात् कृतिश्चैवादौ प्रकारीभूय भासते न च कर्मणभि धानात् चैवादिपदानन्तरं कृतीया स्यादिति वाच्यं कर्मसंख्या नभिधानस्य तच तन्मत्वात् संख्याभिधानयोग्यस्य कर्मत्वाय नवच्छेदः प्रथमान्तपदोपस्थाप्यः कर्मत्वादीत्यस्य विशेषण त्वतात्पर्य्याविषयत्वमर्थः तेन चैवदेव गच्छतीत्यादौ न चैवे संख्यान्वयः यच कर्मादौ न विशेषणत्वतात्पर्य्यं तदारभ्य प्रथमान्तेति यदा धात्वर्थातिरिक्तविशेषणत्वं प्रथमदत्तार्थः तेन चैवदेव गच्छतीत्यच चैवादेर्वारणं श्लोकं पचतीत्यादौ श्लोकादेर्वारणाय च द्वितीयदत्तं तच्च द्वितीयान्तोपस्थाप्यता द्वारकं एवं व्यापारेऽपि न प्रक्रियैगौरवात् रथेनगच्छतीत्यादौ तृ व्यापारे आश्रयत्वे लक्षणा आनातीत्यादौ तु आश्रयत्वे नक्षणा त्यादौ प्रतियोगित्वे विरूढलक्षणा उपस्थानाद्यथा प्रक्रियह त्वोक्तं एवं कोषादपि प्रक्रियहः यति बाधके क्वचित् त्यज्यते यथा नीलादिपदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः क्वीये व्युत्पादिता तथापि लाघवात् नीलादौ शक्तिः नीलादि

सिद्धे शक्तेति एवमाप्तवाक्यादपि यथा बोधिवः पिकपदं वाच्यत्वादिति। पिकादिभिन्नियदः एवं व्यवहारादपि यथा प्रयोजकवृद्धेन घटमानयेत्युक्ते तत् श्रुत्वा प्रयोज्यवृद्धेन घटशब्दाभिन्नशब्दवाच्यं पार्थक्षोवाक्षोघटानयनरूपं कार्यं घटमानयेतिशब्दप्रयोज्यं अवधारयति ततश्च घटमानय मानय इत्यादौ शक्तिग्रहाभ्यां घटादिपदानां कार्यान्वित घटादौ शक्तिं गृह्णाति इत्यत्र भूतले गोक्षोघटइत्यादिशब्दा न्न शाब्दबोधः घटादिपदानां कार्यान्वितघटादिबोधे सामर्थ्यावधारणात् कार्यतात्पर्यबोधं प्रति च शिक्षादीनां सामर्थ्यात् तदभावाच्च शाब्दबोधइत्यपि केचित् तन्न प्रथमतः कार्यान्वितघटादौ शक्तिमवधारणेऽपि लाघवेन पश्चात्तस्य परित्यागौचित्यात् अतएव चैत्र पुत्रस्ते जातः कन्या ते गर्भिणी जाता इत्यादौ सुखप्राप्तदुःखप्राप्तिभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषात् शाब्दबोधं निर्वोढुं तद्धेतुतया तं शब्दमवधारयति तथाच व्यभिचारात्कार्यान्विते न शक्तिः न च तत्र ते पक्षे त्वादिशब्दान्तरमध्याहार्यं मानाभावात् चैत्र पुत्रस्ते जातो नृतश्च इत्यादौ तदभावाच्च इत्यत्र लाघवात्कार्यान्वितघटेऽपि शक्तिं त्यक्त्वा घटपदस्य घटलाभे शक्तिमवधारयति एवं लाघवेनाप्यनियमः यथा वसन्तसमयस्तुरङ्गवतीत्यत्र वयस इव तुरङ्गशब्दस्य वेगवत्यश्वे प्रयोगः कवीनां च सेच्छानां तत्र हि यद्यन्यत्रोपयोगोऽपेक्ष्यते अथैते मोदमानादयोऽपि शक्तिग्रहणे सैन्धवानां जायते पञ्चानां। मोदमानश्च सिद्ध

मित्यत्र यथाः यष्टिप्रवेशिनरहति वाक्यशेषात् दीर्घवृत्ते प्रविशति यष्टौ तु प्रविशमात्रविशेषः नावा प्रविशत्यम्भसि गौरवात् दधिपदाहो तु विशिष्टशक्तिवाक्यात्प्रविशत्यर्थः। एवं विवरणादाहृत्य प्रविशद्यः विवरणन्तु प्रवेशानर्थक्यादाह ईश नहर्थकत्वं यथा घटोऽयमीश्वरस्य कलशोऽयमीश्वरेण विवरणाहृटपदस्य कलशे प्रविशद्यः एवं पचतीत्यत्र पाकं करोतीत्यनेन विवरणादाख्यातस्य यत्नार्थकत्वं कल्प्यते एवं प्रसिद्धपदसन्निध्यादपि प्रविशद्यः यथा दृष्ट सहकारतरौ मधुरं पिकोरौतीत्यादौ पिकपदस्य प्रविशद्यदनि मत्र शक्ता वेव प्रविशेत्तु व्यक्तौ व्यभिचारादानन्त्याच्च व्यक्तिं विना च जाति भानस्यासम्भवाद्व्यक्तेरपि भानमिति केचित् तन्न प्रकृतिं विना व्यक्तिभानानुपपत्तेः न च व्यक्तौ लक्षणा अनुपपत्ति प्रतिसन्धानं विनापि व्यक्तिबोधात् न च व्यक्तिशक्तावपि सकलव्यक्तावेकस्यापि शक्तेः स्वीकारात् न चानुगमः गौरत्व देरेवानुगमकत्वात् किन्तु गौः शक्येति प्रकृतिबोधयदि तदा व्यक्तौ प्रकृतिर्यदि तु गोत्वं शक्यमिति प्रकृतिपदात् गोत्वप्रकारक पदार्थस्मारकं शाब्दबोधञ्च न स्यात् समानप्रकारत्वेव प्रकृति ज्ञानस्य पदार्थस्मारणंशाब्दबोधं प्रतिच हेतुत्वात् किञ्च गोत्वे यदि प्रकृतिस्तदा गोत्वत्वं अवच्छेदकं वाच्यं गोत्वत्वन्तु गवि नरासम्बेतत्वे सति सकलगोसमवेतत्वं तथाच गोव्यक्तीनां अवच्छेदकेऽनुप्रवेशात्तवैव गौरवं तस्मात्तत्तद्व्यक्त्या श्रीविशिष्टतत्तद्व्यक्तिबोधानुपपत्ता कल्प्यमाना प्रकृतिर्जात्या

तितिक्षि तुच्छमौ विद्यान्नलीति शब्दं यदनुकरणशब्दानिशं शब्दि
रूढं शब्दिकेशब्दं शब्दिकैशिकशब्दं यथावयवशक्त्यर्थेण मुख्यो
नञ्जैशिकं यथा पाचकादिपदं यथावयवशक्तिभेदेनैव यतु
द्वारावच्छिन्नयोगेनैव मुख्यो नञ्जूढं यथा गोपदनञ्जगवादिपदं यथ
तु यवयवशक्तिभेदे समुदायशक्तिरस्ति सयौगशब्दं यथा
पङ्कजादिपदं यथाहि पङ्कजपदस्यावयवशक्त्या पङ्कजविकारूप
मर्थं बोधयति समुदायशक्त्या च पङ्कजेन रूपेण मर्थं बोधयति
न च केवलावयवशक्त्या मुख्यो बोधः स्यादिति वाच्यं रूढिज
नस्य केवलयौगिकार्थप्रतिसन्धानाभावादिति माद्यः यद्यपङ्क
समुदायशक्त्योपस्थितपङ्केऽवयवार्थपङ्कजविकर्तुरन्वयोऽवधि
त्वाभिधात् यत्रारूढ्यर्थस्य बाधः प्रतिसन्धीयते तत्र शक्यसम्ब
न्धादेवबोधः यत्र तु समुदायेन रूपेण बोधे न तात्पर्यज्ञान
प्रयोजकस्य च बाधस्यावयवशक्तिमात्रेण निर्वाहदशायाञ्च
यत्र तु खलपक्षादाववयवार्थबाधस्तत्र समुदायशक्त्या च यत्र
मेन रूपेण बोधः यदि तु खलपङ्के विजातीयमेव तदा
शक्तयैव यथावयवार्थारूढ्यर्थयोः खातत्र्येण बोधसयौगिक
रूढं यथोद्भिदादिपदं तत्र हि उद्भेदनकर्त्रा तरुगुल्मादि
रपि बुध्यते योगबलेनेति लक्षणा शक्यसम्बन्धत्वादि मङ्गी
कां गोपदत्वादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे बोधस्य
आनुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते तत्र
लक्षणया तीरस्य बोधः सा च शक्यसम्बन्धः तथाहि प्रवाहरूप
शक्यार्थसम्बन्धस्य तीरे गृहीतस्य तीरस्य स्मरणं ततः प्राह्

बोधः परन्तु यत्रैवमनुपपत्तिर्लक्षणावीजं स्यात्तदा यष्टीः प्रवे
शयेत्यत्र लक्षणा न स्यात् यष्टिषु प्रवेशान्वयस्यानुपपत्तेरभा
वात्तेन यष्टिप्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरे लक्षणा
एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके
लक्षणा वर्मतो दधिरक्षाया वास्तात्पर्यविषयकत्वात् एवं हरिणो
यानीत्यादौ हरिपदस्यैकवाक्यतादिनैव लक्षणा इत्थमेवाज
हत्स्वार्थो लक्षणेत्युच्यते एकवाक्यतादिनैव रूपेण हरितह
रणयोर्बोधात् यदि चानुपपत्तिर्लक्षणावीजं स्यात् तदा क्वचि
त्पदस्य तीरे क्वचिद्दोषपदस्य मञ्चादौ लक्षणेति नियमो
न स्यात् इदन्तु बोध्यं प्रकृतार्थसम्बन्धोयदि तीरत्वेन रूपेण
गृहीतस्तदा तीरत्वेन तीरबोधः यदि तु गङ्गातीरत्वेन
रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणं अतएव लक्षणावच्छे
दकेन लक्षणा तत्प्रकारकबोधस्य तत्र लक्षणा विनाप्युप
पत्तेः परन्तु एवंरूपेण प्रकृतावच्छेदकोपि प्रत्यासन्नः स्यात्
तत्प्रकारकप्रकृतार्थस्मरणं प्रति तत्पदस्य सामर्थ्यमित्यस्य सुव
चत्वादिति विभावनीयं यत्तु प्रकृतार्थस्य परम्परासम्बन्ध
रूपा लक्षणा सा लक्षितलक्षणेत्युच्यते यथा शिरेफादिपदे
रेफद्वयसम्बन्धोभ्रमरपदे भायते भ्रमरपदस्य च सम्बन्धो
भ्रमरे भायते तत्र लक्षितलक्षणा किन्तु साक्षात्कं पदं
नानुभवितं साक्षात्कार्थस्य शाब्दबोधे तु पदान्तरं कारणं
प्रत्यासत्त्यान्यतरसम्बन्धेनेतरपदार्थान्वितस्वप्रकार्यशाब्दबो
धं प्रति पदानां सामर्थ्यावधारणात् वाक्ये तु प्रत्यासेरभावात्

अवयवसम्बन्धरूपा लक्षणापि नास्ति यत्र गभीरायां नद्यां
गोपदमस्तीत्युक्तं तत्र नदीपदस्य गभीरनदीतीरे लक्षणा गभी
रादपदार्थस्य तथा तदभेदेनान्वयः किंचिदेकदेशान्वयस्य
क्षीणत्वात् यदि तत्रैकदेशान्वयोऽपि न क्षीयेत तत्र वही
यदस्य गभीरनदीतीरे लक्षणा गभीरपदं तात्पर्यार्थाधानं
वक्तव्यमेवं तत्र हि चिच्चपदादौ यद्येकदेशान्वयः क्षीयि
येत तदा गोपदस्य गोस्वामिनि लक्षणा यदि चिच्चपदेनान्वयः
यदि तु एकदेशान्वयेन क्षीयियते तदा गोपदस्य चिच्च
गोस्वामिनि लक्षणा चिच्चपदं तात्पर्यार्थाधानं एवमाकृष्ट
वानरोपविष्टवृक्षत्वेन वानरपदे वानरावेशकर्मणि लक्षणा
आरूढपदस्य तात्पर्यार्थाधानं एवमन्यत्रापि तत्पुरुषे तु
पूर्वपदे लक्षणा तथाहि राजपुरुषादिपदे राजपदार्थस्य
पुरुषादिपदार्थस्य वाचानान्वयः निपातातिरिक्तनामार्थयो
र्भेदेनान्वयबोधस्यानुभवसिद्धत्वात् यद्यपि राजा पुरुषवृत्ति
र्यद्यपि तथान्वयबोधः स्यात् तर्हि घटो घटवृत्त्यादौ घटपटा
द्यो नञः वाचार्थेनान्वयात् निपातातिरिक्तेति नीलोघट
वृत्त्यादौ नामार्थयोरभेदसम्बन्धेनान्वयाद्भेदेनेति च न राजा
पुरुषवृत्त्यादौ पुरुषविशेषः स्वत्वं कर्तृत्वमिति वक्तुं
शक्यत्वविभक्तीरपि तत्तोतिग्राह्यत्वात् तस्मात् राजपदादौ
राजकर्तृत्वमिति लक्षणा तच पुरुषेण सहाभेदान्वयः दण्डे तु
अवच्छेदको छिन्नीत्यादौ धवः बहिरस्य विभक्त्यर्थस्य
प्रत्ययेन बुध्यते तत्र लक्षणा न च समहिते प्रत्ययेति वाच्यं

शक्तित्यर्थयोरपि इन्दर्शनात् न च इकशिक्षाभ्यामिति वाच्यं शिक्षाभेदे अवच्छिदो छिन्नीत्यादिदर्शनात् साधित्वञ्च अननुभवाच्च तस्मात् साधित्यादिकं अर्थः अतएव राजपुरीशिनौ वाजपेयकामौ यजेयातामित्यत्र अत्र वाक्यात् इन्दर्शनेऽपि किन्तु वाक्यभेदोऽत्र तत्र इन्द्रः न च नीलघटयोरभेदत्वादौ अर्थमिति वाच्यं तत्र नील पदस्य नीलं घटपदस्य घटसमर्थः अभेदस्तत्रोक्तसमभेदस्यार्थात् समाहारस्तु यदि समाहारोऽप्यनुभूयतस्तु स्थले महाऽहिनकुलमित्यादौ परपदेऽहिनकुलसमाहारे सत्त्वा पूर्वपदं तात्पर्यार्थाश्रयं न च भेरीशब्दं वादयेत्यत्र कर्त्र समाहारस्यान्वयः अपेक्षाबुद्धिविशेषरूपस्य वाहनादेश्च वाहिति वाच्यं परम्परासम्बन्धेन तदन्वयात् इयं पञ्चपुत्रो आदावपि परे तु अहिनकुलमित्यादौ अहिर्नकुलञ्च युध्येते प्रत्येकमेकत्वान्वयः समाहारसंज्ञा च यत्र इकत्वं नपुंसकत्वं साधित्वं चेत्यादिरूपेणेत्यं नचैव अत्रैवावयवसमवायिनि यदपि। कर्मधारयस्थले तु नीलश्चासौ घटश्चेत्यादौ अभेदस्य त्वेन नीलपदार्थोऽत्यन्तपदार्थे प्रकारः न च तत्रापि अत्र एव निपातस्यार्थे याजपेयिन्यश्च ते तत्कुलः सङ्घश्चाभ्यां किन्तु कर्मधारयोऽत्रोक्तसमाहारात् न च निपातस्य कोऽर्थः निपातेऽपि भेदान्वयित्वात् आवश्यकत्वादिति वाच्यं निपातस्य विशेषणयुक्तेऽपि तत्र वाक्यात् साधित्वेन मुख्यार्थेऽन्वये अननुभवस्य तत्रत्वात् अननुभवोरवत्वा अक्षोपनीतेति

उपकुर्वं अर्थापत्तिरूपो हारो परंपरे तत्समभिव्याहृतपूर्व पदार्थप्रधानतया आनन्तर्यावधारणे दृश्यश्रवणयोर्न कापि क्षतिः पदत्रयमेव निर्व्यूढादितिनितरां गच्छतीत्यादौ पदे जनकदण्डादीः गच्छतीत्यादौ स्त्रीजनकादण्डादीर्लक्षणा इव अन्यत्रापि घटादयादौ न लक्षणा घटत्वेनैव नानाघटस्थितिसम्भवात्। आकाङ्क्षितो योग्यता इत्यादि आकाङ्क्षितज्ञानं योग्यतज्ञानं आकाङ्क्षाज्ञानं नात्यर्थज्ञानञ्च शाब्दबोधे कारणं तत्रासन्निपदार्थस्मारकं सन्निधानमिति यत्पदार्थेन यत्पदार्थे आन्वयोऽपेक्षितः तयोरव्यवधानेनोपस्थितिः कारणं नेनगिरिभुक्तमग्निमान् देवदत्तेनेत्यादौ न शाब्दबोधः। आकाङ्क्षाभ्रमात् शाब्दभ्रमाभावेऽपि न क्षतिः वनु यत्र हरौ सुप्तस्त्री यायस्त्री देवदत्तदत्युक्तं तत्रोत्तरपदस्मारकेण पूर्वपदस्मारकस्य नाशात् अव्यवधाने तु उत्तरपदस्मारकाभावादिति चेन्न प्रत्येकपदसंस्कारैरुत्तरं तादृशैकपदस्मारकस्याव्यवधानेनोत्पत्तेः नानासन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणस्यापि सम्भवात् यावत्पदसंस्कारसहितचरमवर्णशाब्दबोधकत्वात् कथमनन्वया नानार्थकपदस्मरणं वरं वनु तावत्पदार्थानां स्मारकाभावेऽपि खले कपोतन्यायात् यावत्पदार्थानां क्रियाकर्मभावेनान्वयबोधरूपः शाब्दबोधोऽपि कश्चिदिति केचित् अपरे तु यत्पदाभ्यां यं योग्यं सन्निधानं न तयोः सः तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते। तथाच सङ्क्षेपतो नानार्थबोधानन्तरं तथैव पदार्थानुभवे महावाक्यार्थबोध

दत्यध्याहः इतेन नावच्छेदकाभिधानः घटसंयोगोऽपि निरव-
यः तत्रावच्छेदकसंस्कारविशिष्टचरमवर्णोपस्थापकेन तदुच्चारणेनैवोप-
स्थितिरिति दण्डमादाय घटमानयेत्यादौ दण्डकर्मकसंयोगं तत्र विधेरीति पदज्ञा-
नादेव बोधः न तु विधानादिरूपार्थज्ञानात् पदजन्य
पदार्थोपस्थितीच्छाज्ञानयोर्हेतुत्वात् किञ्च क्रियाकर्मपदानां
मेन मेनेत्र यङ् वाक्यात्तत्तात् तेन क्रियापदं विना कर्मं मान्नं
बोधः स्यात् तथा पुष्पेभ्यस्त्यादौ सृजतीति पदाध्याहारं
विना चतुर्थ्यनुपपत्तेः पदाध्याहारश्चावश्यकः। योग्यतां विनापि
चैत्रादयस्त्वादिना एकपदार्थेऽपरपदार्थसम्बोधोयमनयोरर्थः
तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः तत्रे
तत्रायोग्यतावाच्छानं शाब्दबोधात्राक् कर्मत्व न यत्नवति
वाक्यार्थत्वापूर्णत्वादिति चेन्न तत्तत्पदार्थस्मरणे सति तत्रापि
संसर्गरूपत्व तत्रिरूपत्वरूपत्वापि योग्यतावाच्छानस्य सत्त्वा
त्तत्र तु योग्यतावाच्छानं न शाब्दज्ञाने कारणं वह्निना
सिञ्चतीत्यादौ वेके वह्निकरत्वाभावरूपा योग्यतानिश्चयेन
प्रतिबन्धात् न शाब्दबोधः तद्भावनिश्चयस्य लौकिक यत्ने
कर्माजन्यदोषविशेषाजन्यज्ञानमात्रे प्रतिबन्धकत्वात् शाब्दं
प्रति प्रतिबन्धकत्वं सिद्धं योग्यताज्ञानविरहत्वाच्च शाब्दविल
म्बोऽसिद्धुरिति वदन्ति। वाक्यार्थं निर्मिमीते तत्पदेनेत्यादि
तेन पदेन विना चत्पदस्य अन्वयानुभावकत्वं तेन यङ् तत्रा
काङ्क्षेत्यर्थः क्रियापदं विना कारकपदं शाब्दबोधं
जनयतीति तेन तत्राकाङ्क्षा वस्तुतस्तु क्रियाकारकपदाभी

शक्तिभ्रमभावत्वात् चरितार्थं वरन्तु षटकर्मजन्यबोधं प्रति षट्पदीपदरहितीयाकाङ्क्षाज्ञानं कारणं तेन षटः कर्मजन्यः घनं क्षतिरित्यादौ न बोधः अयमेति पुंसोराज्ञः पुरुषोऽपवार्यतां इत्यादौ तु पुंचेत्यत्र राजपदस्य तात्पर्यं ग्रहाभावात् न तेन सहान्वयः। तात्पर्यं निर्णयेति मनुरित्येति यदि तात्पर्यज्ञानं कारणं न स्यात् तदा चैत्रचक्षुरालभेत्यादौ क्वचिदपि क्वचिदपि बोधो न स्यात् न च तात्पर्यग्राहक प्रकरणादीनामेव शाब्दबोधे कारणत्वमस्त्विति वाच्यं तेषा मननुगमात् तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्य ज्ञानमेव साक्षात्कारणमस्तु इत्यत्र वेदस्यापि तात्पर्य ज्ञानार्थमीश्वरः कारणं न च तथाविधतात्पर्यज्ञानं कारणमिति वाच्यं सर्गादावध्यापकाभावात् न च प्रलयस्यैव साक्षीति श्रुतः सर्गादिरिति वाच्यं प्रलयस्यागमप्रतिपाद्यत्वात् इत्यत्र मूकत्वापत्तेऽपि ईश्वरीयतात्पर्यज्ञानं कारणमित्यावा दिमूलकवादे तु शिक्षयितुरेव तात्पर्यज्ञानं कारणं वादे तु नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणं तथाच मूल वादे विनैव तात्पर्यज्ञानं शाब्दबोधः वेदे तु अनादिमीमांसा परिशोधितनैरर्थक्यावधारणसिद्धाऽतः। पूर्वमनुभवस्यैव कारणत्वं स्यात् बुद्धेर्विधयुक्तं तथानुभवप्रकारादर्शिनाः सुमतयस्तत्रा कारणं न दर्शितं तत्र हि पूर्वानुभवः कारणं अत्र कोऽपि अनुभवत्वेन न कारणत्वं किन्तु ज्ञानत्वेन अन्यथा कारणा नवस्थां कारणं न स्यात् तत्तज्ञानप्रकारकत्वेन पूर्वानुभवस्य कारणत्व

विलक्षणत्वात् मानसे तु तेनैव स्मरणेन संस्कारजन्यस्मरणद्वारा तादृ
शस्मरणं प्रत्यक्षत्वाऽऽह: ननु यत्र समूहालम्बनात्मकं घट
घटादीनां ज्ञानेन स्मरणमजनिष्ट सकलविषयकस्मरणन्तु
नाभूत् तत्र फलस्य संस्कारनाशकत्वाभावात् कालस्य
रोगस्य चरमफलस्य वा संस्कारनाशकत्वं वाच्यं तथाच न
क्रमिकस्मरणानुपपत्तिः न च पुनः पुनः स्मरणात्दृढतरः संस्का
रानुपपत्तिः झटित्युदोधकत्वमेवधारणस्य दार्ढ्यमदार्थत्वात्
न च विनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्वं स्या
दिति वाच्यं विशेषधर्मेण व्यभिचारात् ज्ञाने सामान्य
धर्मेणान्यथासिद्धत्वात् वाच्यत्वन्यथा दण्डस्य भ्रमिद्वारा घ
टत्वेन घटेच कारणत्वं न चाप्तराक्षिकस्मरणाजं संस्कारनाश
कत्वसंभवात् व्यभिचारसंभवइति वाच्यं अनुभवसंस्कारतजन्य
स्मरणापेक्षया चरमस्मरणस्यैव संस्कारनाशकत्वकल्पनेन व्यभि
चारसंभवाभावात्। इदानीं मानसं प्रमाणं लक्षयति
ज्ञानाकरणमिति. एतेन मनसि प्रमाणं दर्शितं तथाहि सुख
ज्ञानाकरणं सकरणकं ज्ञानत्वे सति करणाजन्यत्वात् चाक्षुषवत् इत्य
नुमानेन करणस्य मनसः सिद्धेः न चैवं दुःखादिसाक्षात्का
रेऽनुमितिकारणान्तराणि सन्तीति वाच्यं लाघवादेकस्यैव ता
दृशस्यकल्पनासाक्षात्कारकरणतया सिद्धेः एवं दुःखादीनामपि
अनाधिकारणसंयोगाजन्यतया मनोविशिष्टैर्बोद्धव्या। मनसोऽ
नुमे प्रमाणमाह अनेकद्रव्यवृत्तीति ज्ञानानां चाक्षुषरासमा
हीनां यौगपद्यं एककालोत्पत्तिर्मनसीत्यनुभवसिद्धं तच्च नानी

स्थितयोः यद्यपि विषयसन्निकर्षे सत्यस्मदादेरेकेन्द्रियेण ज्ञानमुत्पद्यते तदसम्भवादपि लिङ्गादिभिः परैर्ज्ञानं नोत्पद्यते तस्य नोत्पिभुत्वे च अयत्नविधानं न सम्भवतीति न विभुमनः। न च तदा श्रोत्रदृष्टविशेषादोधविलम्बादेव तज्ज्ञानविलम्बइति वाच्यं तथा सति चक्षुरादीनामपि कल्पनानापत्तेः। न चादृष्टं मनसो भक्षणादौ नानावधानभाजश्च कथमेकलादिना नेन्द्रियस्येति वाच्यं मनसोऽतिलाघवात् तस्यात्मेन्द्रियसन्निकर्षात् ज्ञानाज्ञानोत्पत्तेः उत्पलशतपत्रभेदादिवत् यौगपद्यमत्र यत्तु भ्रान्तत्वात् न चक्रमकः सङ्कोचविकासमालिलाकुम्भोपपत्तिरित्यपि वाच्यं नानावयवतत्सङ्कोचादिकल्पने गौरवात् लाघवात् निरवयवस्यैव मनसः कल्पनादिति संक्षेपः। इति सिद्धान्तमुक्तावल्यां द्रव्यपदार्थव्याख्या समाप्ता।

द्रव्यं निरूप्य गुणं निरूपयति। अथेत्यादिना मुखलक्षणतोऽपि किं ज्ञानमिति चेत् इदं इदं कर्मभिन्नसामान्यवति सा जातिरूपा वा किञ्चिद्धर्मावच्छिन्ना निरवच्छिन्नकारणतायाश्चासम्भवात् तद्रूपत्वादिकं सत्ता वा तज्जावच्छेदिका न्यूनातिरिक्तदोषदुष्टत्वात् अनन्तर्विशत्यनुगतं वाच्यं तदेव गुणत्वमिति सिद्धं। द्रव्याश्रितइति यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावतिव्याप्तेस्तथापि द्रव्यत्वव्यापकतावच्छेदकसत्तान्यत्वं तद्वत्त्वं हि भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छेदकं तद्वत्ता च गुणत्वमिति कर्मत्वं द्रव्यत्वं वा न द्रव्यत्वव्यापकतावच्छेदकं योगजादौ द्रव्यकर्मणोरभावात् द्रव्यत्वं चारब्धत्वादिकं न

त्यादिरिति तद्व्युदासः। निर्गुणत्वादिति यद्यपि निर्गुणत्वं कर्मादावपि तथापि सामान्यवत्त्वे कर्मान्यत्वे च सति निर्गुणत्वं बोध्यं तेन त्वादीनां न सामान्यवत्त्वं कर्मत्वेन कर्मान्यत्वं द्रव्यत्वस्य न निर्गुणत्वं इति तत्र नातिव्याप्तिः निष्क्रियेति स्वरूपकथनं तु सत्त्वं गगनादावतिव्याप्तं मूर्त्तगुणादिति वैशेषिकसिद्धान्तापेक्षोऽप्युपलक्षणीयः अमूर्त्तेषु न वर्त्तमानत्वार्थः सत्त्वस्य तावद्व्याप्यत्वं स्वसमवेतेऽपि उभयवैशिष्ट्यमिति मूर्त्तामूर्त्तगुणवृत्त्यर्थः अनेकाश्रितादिति संयोगद्वित्वादीनि दृष्टान्तीनि चित्रचक्षुरादिकं चित्र तुरादिदृष्टान्तीति बोध्यं अतः प्रेक्षादिति रूपरसगन्धस्पर्शैक त्वपरिमाणैकपृथक्त्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्न गुरुत्वद्रवत्वस्नेहसंस्काराष्टगुणभ्यादित्यर्थः। द्रव्यत्वं वैशेषिकादिति विशेषाएव वैशेषिकाः स्वार्थे ठक् विशेषगुणा दित्यर्थः। सङ्ख्यादिरिति सङ्ख्यापरिमाणपृथक्त्वसंयोगविभाग परत्वापरत्वानीत्यर्थः। द्वीन्द्रियेति चक्षुषा त्वचापि ग्रहण योग्यत्वात्। वाह्येति रूपादीनां चक्षुरादिग्राह्यत्वात्। विभुना मिति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाग्राह्या दित्यर्थः। अकारणेति कारणगुणपूर्वकारूपादयोवक्ष्यन्ते बुद्ध्यादयस्तु न तादृशाः आत्मादेः कारणाभावात् पाकज रूपादीनां कारणगुणपूर्वकत्वाभावात् अपाकजदृष्टत्वं स्पर्शान्तादिति स्पर्शोऽत्रानुष्णाशीतग्राह्यः। एकपृथक्त्वेत्यत्र सं ख्यायत्र प्रत्येकमन्वयात् एकत्वं पृथक्त्वस्य यावत् पृथक्त्व भेदेन चैकपृथक्त्वं विवक्षितं भेदश्चभावाधिकमिति घटादि

रूपरसगन्धस्पर्शाः कपालादिरूपरसगन्धस्पर्शेभ्योभवन्ति एवं कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायिकारणत्वं एवं शब्दस्यापि द्वितीयशब्दं प्रति निमित्तमस्मिन् पुंस्त्वादीनां दण्डादिनिमित्तत्वादिति भावः। हेतुतादृश इति असमवायिकारणत्वं निमित्तकारणत्वञ्च तथाहि उष्णस्पर्शः उष्णस्पर्शस्यासमवायी पाकजे निमित्तं गुरुत्वं गुरुत्वपतनयोरसमवायिप्रतिघाते निमित्तं वेगोवेगस्यन्दयोरसमवायी अभिघाते निमित्तं द्रवत्वं द्रव्यत्वस्यन्दनयोरसमवायि संयोगे निमित्तं भेरीदण्डयोः शब्दे निमित्तं भेर्याकाशसंयोगोऽसमवायी वंशशब्दवंशविभागः शब्दे निमित्तं वंशशब्दाकाशविभागोऽसमवायीति न द्वित्वेति परत्वादीनां नासमवायिकारणत्वं न निमित्तकारणत्वञ्चेत्यर्थः। इदञ्च ज्ञानातिरिक्तभावं प्रति बोध्यं द्वित्वादिपदेन च विशेषोद्देश्यः तेन परमाणुद्वित्वादेर्द्व्यणुकादिपरिमाणहेतुत्वेऽपि न क्षतिः प्रादेशिकः अथा व्यवृत्तिः। चक्षुरिति रूपत्वजातिः प्रत्यक्षसिद्धा रूपशब्दो ऽस्त्विनी प्रतीतिर्नास्तीति चेत् मास्तु रूपशब्दप्रयोगः तथापि नीलपीतादिषु अनुगतजातिविशेषोऽनुभवसिद्ध एव रूपशब्दा प्रयोगेऽपि नीलोवर्णः पीतोवर्ण इति वर्णशब्दोऽस्त्विनी प्रतीतिरस्त्येव एवं नीलत्वादिकमपि प्रत्यक्षसिद्धं नचैकैकाएवनील रूपादिव्यक्तयइत्येकव्यक्तिवृत्तित्वात् नीलत्वादिर्न जातिरिति वाच्यं नीलोनष्टः रक्तउत्पन्नइत्यादिप्रतीतेर्नीलादेरुत्पाद विनाशग्राहितया नाशात्वात् अन्यथा एकनीलनाशे जगद्

Digitized by Google

नीलमापद्यत न च नीलरक्तादिसमवाययोरेव विनाशोत्पाद् विषये कोऽसावेषप्रत्ययइति वाच्यं प्रतीत्या समवायानुच्छेदात् न च सएवायं नीलइति प्रत्ययात् लाघवाच्चैक्यमिति वाच्यं प्रत्यक्षस्य तज्जातीयविषयकत्वात् सैवेयं गुर्व्वीरीतिवत् लाघवप्रत्यक्षबाधितं अन्यथा घटादीनामप्येकत्वप्रसङ्गात् उत्पादविनाशशब्दबुद्धेः समवायावलम्बनलाभस्तेनिति एतेन रसादिकं व्याख्यातं। चक्षुर्ग्राह्यमिति चक्षुर्ग्राह्यविशेषगुणइत्यर्थः एकमप्येऽपि द्रव्यादेरिति उपलब्धकं उपलब्धिकारणं इदमेव विवृणोति चक्षुषइति द्रव्यगुणकर्म्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपं कारणं तद्रूपं शुक्लनीलपीतरक्तकृष्णकर्व्बुरादिभेदात् अनेकप्रकारकं भवति ननु कर्व्बुरं कथमतिरिक्तरूपं भवति इत्यं नीलपीताद्यारब्धोऽवयवी न तावन्नीलरूपः अप्रत्यक्षप्रसङ्गात् नापि व्याप्यवृत्तिनीलादिकमुत्पद्यते पीतावच्छेदेनापि नीलोपलब्धिप्रसङ्गात् नाप्य व्याप्यवृत्तिनीलादिकमुत्पद्यते व्याप्यवृत्तिजातीयगुणानाम व्याप्यवृत्तित्वे विरोधात् तस्मात् नानाजातीयरूपेऽवयविनि विजातीयं चित्रमारभ्यते अतएव एकं चित्रमित्यनुभवोऽपि नामारूपकल्पनेतु गौरवात्। इत्थञ्च नीलादीनां पीताद्यारब्धे प्रतिबन्धकत्वकल्पनात् अवयविनि न पीताद्युत्पत्तिः। एतेन स्पर्शोव्याख्यातः रसादिकमपि नाप्याप्यवृत्तिः किन्तु नानाजातीयरसवदवयवैरारब्धेऽवयविनि रसाभावेऽपि न क्षतिः। तत्र रसनजा अवयवरसएव गृह्यते रसनेन्द्रियादीनां

प्रत्यक्षं सामर्थ्याभावात्। अक्षत्वविशेषरूपेऽपि चक्षुषेरभावात्। नव्यास्तु तत्राप्याश्रयदृश्यैकजातीयरूपं नीलादेः पीतादिप्रतिबन्धकतावच्छेदके गौरवात् अतएव लोहितोयस्तु वर्णेन मुखे पुच्छे च सोऽरुरित्यादि शास्त्रमप्युपपद्यते न च व्याप्याव्याप्यवृत्ति जातीयद्वयोर्विरोधे मानाभावात् न च लाघवादेकं रूपं अनुभवविरोधात् अन्यथा घटादेरपि लाघवादेकं स्यादिति इतेन सर्वादिकं व्याख्यातमिति वदन्ति। जलादीति जलपरमाणौतेजःपरमाणौच रूपं नित्यं पृथिवीपरमाणुरूपन्तु न नित्यं पाकेन रूपान्तरोत्पत्तेः न हि घटस्य पाकानन्तरं तद्घटवोत्पत्तिरुपपद्यते न हि रक्तकपालस्य कपालिका नीलावयवा भवन्ति एवं क्रमेण परमाणावपि पाकसिद्धेः अन्यच्च जलतेजःपरमाणुरूपभिन्नरूपं सहेतुकं जन्यं। रसं निरूपयति रसयतीति रसकारीति रसनज्ञाने रसः कारणमित्यर्थः। पूर्ववदिति जलपरमाणौ रसोनित्योऽन्यः सर्वोऽपि रसोऽनित्य इत्यर्थः। गन्धं निरूपयति घ्राणयाचारीति उपकारकः घ्राणजन्यज्ञाने कारणमित्यर्थः अन्योगन्धः सर्वोऽनित्यएव। स्पर्शं निरूपयति स्पर्शयतीति उपकारकतीति त्वगिन्द्रियग्राह्ये स्पर्शः कारणमित्यर्थः। अनुष्णाशीतइति पृथिव्यांवायौच स्पर्शोऽनुष्णाशीतः जलस्य शीतः तेजसउष्णः। काठिन्येति कठिनसुकुमारस्पर्शः पृथिव्यामेवेत्यर्थः कठिनत्वादिकन्तु न संयोगनिष्ठोजातिविशेषः चक्षुर्ग्राह्यापत्तेः। पूर्ववदिति जलतेजोवायुपरमाणुस्पर्शानित्यास्तद्भिन्नस्पर्शास्त्वनित्याइत्यर्थः एतेषां रूपरसगन्ध

स्पर्शानां नान्यचेति पृथिव्यादि रूपरसगन्धस्पर्शपरावृत्तिः पावकसंयोगादुपलभ्यते न हि यतधापि भ्रायमाणे जलादौ रूपादिकं परावर्त्तते नीरे शैरभमौष्ण्यञ्च अन्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते पवनपृथिव्योः शीतस्पर्शादिवत् तचापि पृथिवीष्वपि मध्ये परमाणावेव पाकदृत्ति वैशेषिकावदन्ति तेषामयमाशयः अवयविना अवष्टब्धेषु अवयवेषु पाको न सम्भवति परन्तु वह्निसंयोगेनावयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः पुनश्च एकपरमाणुसंयोगात् द्व्यणुकादिक्रमेण पुनर्महावयविपर्य्यन्तमुत्पत्तिः तेजसामतिशयितवेगवत्त्वात् पूर्व्वव्यूहनाशोऽटिति व्यूहान्तरोत्पत्तिश्चेति। अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पद्यते रूपादिमद्भवतीति शिष्यबुद्धिवैशद्याय प्रक्रियासंयोगविभागयोरनपेक्षकारणं कर्म्मदृति वैशेषिकसूत्रं तच स्यात् स्वोत्तरवृत्तिभावान्तरानपेक्षत्वं तस्यार्थः अन्यथा कर्म्मणोऽणुत्तरसंयोगजनने पूर्व्वसंयोगनाशापेक्षत्वादव्याप्तिः स्यादिति तच विभागजविभागानङ्गीकारे विभागः किञ्चित्सापेक्षो विभागं जनयेत् निरपेक्षस्य तत्त्वे कर्म्मत्वं स्वतन्त्राः परमाणवः पच्यन्तदृति वैशेषिकमतं तच यदि द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात् तदा द्व्यणाः अथ द्रव्यनाशविशिष्टं कालमवयवं वापेक्ष्य विभागजविभागः स्यात् तदा एकादशक्षणाः तथाहि वह्निसंयोगात् परमाणौ कर्म्म ततः परमाण्वन्तरेण विभागः ततश्चारम्भकसंयोगनाशः ततोद्व्यणु

कनाशः ततः परमाणौ श्यामादिनाशः ततोरक्ताद्युत्पत्तिः ततोद्रव्यारम्भानुगुणक्रिया ततोविभागः ततः पूर्व्वसंयोगनाशः ततश्चारम्भकसंयोगः ततोद्व्यणुकोत्पत्तिः ततोरक्ताद्युत्पत्तिः ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणक्रियास्तिति चेन्न अग्निसंयुक्ते परमाणौ यत्कर्म्म तद्विनाशमन्तरेण गुणोत्पत्तिमन्तरेण च तत्र परमाणौ क्रियान्तराभावात् कर्म्मवति कर्म्मानुत्पत्तेः निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च तथापि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेन्न पूर्व्वरूपादिध्वंसस्य रूपान्तरे हेतुत्वात् इति नवक्षणा अथ दशक्षणास्ते च आरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजनने सति स्यात् तथाहि वह्निसंयोगात् द्व्यणुकारम्भके परमाणौ क्रिया ततोविभागः ततश्चारम्भकसंयोगनाशः ततोद्व्यणुकनाशविभाजकविभागौ ततः श्यामनाशपूर्व्वसंयोगनाशौ ततो रक्तोत्पत्युत्तरसंयोगौ ततोवह्निनोदनजन्यपरमाणुकर्म्मणो नाशः ततोऽदृष्टवदात्मसंयोगात् द्रव्यारम्भानुगुणक्रिया ततो विभागः ततः पूर्व्वसंयोगनाशस्ततश्चारम्भकसंयोगः ततोद्व्यणुकोत्पत्तिः ततोरक्ताद्युत्पत्तिः अथैकादशक्षणाः वह्निसंयोगात् परमाणौ कर्म्म ततोविभागः ततोद्रव्यारम्भकसंयोगनाशः ततो द्व्यणुकनाशः ततोद्व्यणुकनाशविशिष्टं कालमपेक्ष्य विभागजविभागः ततः पूर्व्वसंयोगनाशः ततउत्तरसंयोगः ततः परमाणुकर्म्मनाशः ततोऽदृष्टवदात्मसंयोगात् द्रव्यारम्भानुगुणक्रिया

Digitized by Google

नतोविभागः ततः पूर्वसंयोगनाशः ततोद्रव्यारब्धकर्मसंयोगः ततोद्व्यणुकं ततोरूपादिसमसमयद्व्यवृत्तिसमवायात् न रूपसमवायिकारणाभावात् नापि समवायिकारणसंयोगनाशात् किन्तु प्रत्युत्पादकोनाशकक्षणदा नष्टे रूपादिसमवायिनाशे नीरूपमिदं परमाणुः स्यात् नाशकसंयोगोत्पादकक्षणदा रूपोत्पत्तौ सद्द्रव्यनाशे रूपस्य न स्यात् एवं परमाण्वन्तरे कर्मचिरस्थायित्वात् प्रथमादिक्षणेऽपि गुणोत्पत्तिः तथाहि एकत्र परमाणौ कर्म ततोविभागः ततश्चारब्धकसंयोगनाशःपरमाण्वन्तरकर्मणो ततस्तु द्व्यणुकनाशः परमाण्वन्तरकर्मजस्य विभागस्यैकः कालः ततः श्यामादिनाशः विभागाच्च पूर्वसंयोगनाशस्यैकः कालः ततोरूपोत्पत्तिः द्रव्यारब्धकसंयोगश्चेति एकः कालःअथ द्व्यणुकोत्पत्तिः अथ रूपोत्पत्तिरिति प्रथमक्षणाः द्व्यणुकाश्रयस्य कालं परमाण्वन्तरे कर्मचिरस्थायित्वात् षष्ठे गुणोत्पत्तिः तथाहि परमाणुकर्मणा परमाण्वन्तरविभागः ततश्चारब्धसंयोगनाशः अथ द्व्यणुकनाशःपरमाण्वन्तरकर्मणो अथ श्यामनाशः परमाण्वन्तरकर्मजस्य विभागः ततोरूपोत्पत्तिः परमाण्वन्तरे पूर्वसंयोगनाशस्य ततः परमाण्वन्तरसंयोगः ततोद्व्यणुकोत्पत्तिः अथ रूपोत्पत्तिरिति एवं श्यामनाशक्षणे परमाण्वन्तरे कर्मचिरत्वात् अस्य क्षणाः रूपोत्पत्तिसमकालं परमाण्वन्तरे कर्मचिरत्वात् अष्ट क्षणाइति। वैशाधिकानामिति वैशाधिकानां मते द्व्यणुकादौ अवयविन्यपि प्राक्भवति तेषामयमाशयः अवयविनां सच्छिद्रत्वादङ्गैः सूक्ष्मावयवैरन्यःप्रविष्टैरवयवैस्य

मङ्गलेऽपि वाक्येऽविरुध्यते वैशेषिकमते अनन्ताश्रयवतश्च ज्ञानस्यैव गौरवात्। इत्थञ्च योऽयं घटादित्यादिप्रत्यभिज्ञादि सङ्गच्छते यच्च तु न मत्यभिज्ञा सर्वावयविनाशेऽपि स्थीयत इति। संख्यां निरूपयितुमाह नवस्वेऽपि गगनत्वव्यवहाराधारतावच्छेदकं संख्येत्यर्थः नित्येष्विति नित्येषु परमाण्वादिषु एकं नित्यं अनित्ये घटादौ एकत्वमनित्यमित्यर्थः। द्वित्वादयो व्याख्यास्यन्तिसंख्याः अपेक्षाबुद्धिजन्याः अनेकेति यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्त्तते तथाप्येकोऽहमिति प्रत्यक्षाभावात् एकोऽहमिति प्रत्यक्षसत्वाच्च द्वित्वादीनां पर्य्याप्तिसम्बन्धः कल्पन एवान्नेऽनेकाश्रयोऽभ्युपगम्यते। अपेक्षाबुद्धिर्वाच्यादिति प्रथममपेक्षाबुद्धिस्ततोद्वित्वोत्पत्तिः ततोविशेषणज्ञानं द्वित्वविविक्तकत्वरूपं ततोद्वित्वविशिष्टप्रत्यक्षं अपेक्षाबुद्धिनाशश्च ततोद्वित्वनाशश्चेति यद्यपि ज्ञानमात्रं विषयसम्बन्धं विनापि स्वसमवायिसंयोगविभुविशेषगुणानां खोत्पत्तिरक्षणवर्त्तिगुणग्राह्यत्वात् तथाप्यपेक्षाबुद्धेर्विषयसम्बन्धादिलं कल्प्यते अन्यथा निर्विकल्पककाले अपेक्षाबुद्धिनाशात् अनन्तरं द्वित्वस्यैव नाशः स्यात्तु द्वित्वप्रत्यक्षं तद्दार्ढ्यं विषयाभावात् विषयसम्बन्धेन चक्षुरादिवा ज्ञानजनकदोषनाशात् तच्चाद्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते तथापेक्षाबुद्धिर्वाच्यात्रयं द्वित्वमनुभवतीति वाक्यं कालान्तरे द्वित्वप्रत्यक्षाभावात् अपेक्षाबुद्धिस्तदुत्पादिका तथाच ज्ञानजन्यसंस्कारजन्यत्वात् अतएव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वं द्वेनैव इत्यनुभवति कल्प्यते तथापेक्षाबुद्धेर्द्वित्वप्रत्यक्षकार

चलमस्तिति वाच्यं लाघवेन द्वित्वं प्रति कारणत्वस्यैवोचित त्वात् अतीन्द्रिये द्व्यणुकादावपेक्षाबुद्धिर्योगिनां सर्गादिकाली नपरमाण्वादावीश्वरीयापेक्षाबुद्धिर्ब्रह्माण्डान्तरवर्त्तियोगिना मपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति अपेक्षाबुद्धिः केत्यत आह अनेकेति अयमेकदृत्याकारिका दृत्यर्थः दृदन्तु बोध्यं यत्रा नियतैकत्वज्ञानं तत्र द्वित्वादिभिन्ना बहुत्वसंख्योत्पद्यते यथा सेनावनादाविति कन्दलीकारः। आचार्य्यास्तु चित्वादिक मेव बहुत्वं मन्यन्ते तथाच चित्वत्वादिव्यापिका बहुत्वजातिः सेनादौ चोत्पन्नेति चित्वादौ चित्वत्वाद्यग्रहोदोषादित्यच दृतोबहुकेयं सेनेति प्रतीतिरुपपद्यते बहुत्वस्य संख्यान्त रत्वे तत्तारतम्याभावादित्यवधेयं। परिमाणं निरूपयति परि माणमिति परिमितव्यवहारासाधारणं कारणं परिमाण मित्यर्थः तच्चतुर्विधं अणु महद्दीर्घं ह्रस्वञ्च दृदञ्चातुर्वि धं प्रत्यक्षसिद्धं तत्राणुत्वह्रस्वत्वे महत्त्वदीर्घत्वे च समनियते तत्परिमाणं नित्यमित्यत्र परिमाणमित्यनुषज्यते जाय तदृत्यत्रापि परिमाणमित्यनुवर्त्तते अनित्यमिति पूर्वेणा न्वितं तथाचानित्यं परिमाणं सङ्घाजन्यं परिमाणजन्यं प्रच यजन्यं चेत्यर्थः। तत्र सङ्घाजन्यमुदाहरति द्व्यणुकादा वितिं द्व्यणुकस्य चसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकादिपरिमाणं वा न कारणं परिमाणस्य स्वसमान जातीयोत्कृष्टपरिमाणजनकत्वात् द्व्यणुकादिपरिमाणन्तु पर माणुत्वापेक्षया नोत्कृष्टं चसरेणुपरिमाणन्तु न सजातीयं

अतः परमाणौ द्वित्वसङ्ख्या द्व्यणुकपरिमाणस्य द्व्यणुके चित्र सङ्ख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः। परिमाणजन्यमुदाहरति परिमाणं घटादाविति परिमाणजं कपालादि परिमाणजन्यं। प्रचयजन्यमुदाहर्त्तुं प्रचयं निर्व्यक्ति प्रचयदृति अर्थात्प्रचयस्य न चावयविनाश्रः कथं परिमाणनाश्यकः अवयव्यवयविनि चित्रतुरपरमाणुविश्लेषे तदुपचये चावयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यं परमाणुविश्लेषे द्व्यणुकस्य नाशोऽवश्यमभ्युपेयस्तन्नाशे च द्व्यणुकनाशः एवं क्रमेण महावयविनोनाश्रस्यावश्यकत्वात् यति च नाश्रकेऽनभ्युपगममात्रेण नाश्रस्य अपवदितुमशक्यत्वात् शरीरादाववयवोपचये असमवायिकारणनाश्रस्यावश्यकत्वाद्वयविनाश्रश्चावश्यकः न च पटविनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं स्यादिति वाच्यं तत्रापि वेमाद्यभिघातेन समवायिकारणतन्तुसंयोगनाशात् पटनाश्रस्यावश्यकत्वात् किञ्च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्व्वं तत्पटएव न स्यात् तत्तन्तुरूपकारणाभावात् तत्तन्तोरेव अवयवाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्यान्तरवत् तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्व्वपटनाश्रतः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्य्यं अवयविनः प्रत्यभिज्ञानन्तु साजात्येन दीपकलिकादिवत् न च पूर्व्वतन्तवएव तन्त्वन्तरसहकारात् पूर्व्वपटे सत्येव पटान्तरमारभ्यमिति वाच्यं मूर्त्तयोः समानदेशतविरोधात् एकदा नानाद्रव्यस्य तत्रानुपलब्ध

बाधितत्वाच्च पूर्वद्रव्यस्य प्रतिबन्धकत्वं विनाशे द्रव्यान्तरो
त्पत्तिरित्यवश्यमभ्युपेयत्वात्। पृथक्त्वं निरूपयति संख्याव
दिति पृथक्प्रत्ययासाधारणं कारणं पृथक्त्वं नञित्यतादिकं
संख्यावत् तथाहि नित्येषु एकत्वं नित्यं अनित्येऽनित्यं अनि
त्यमेकत्वं आद्यद्वितीयचतुर्थेभ्योत्पद्यते आद्यघनाद्यारब्धस्य
तथैकपृथक्त्वमपि द्वित्वादिवत् पृथक्त्वादिकमपीत्यर्थः नन्व
भेदात् पृथक् इत्यादावन्योन्याभावोभासते तत्कथं पृथक्त्वं
गुणान्तरं स्वीक्रियते नञ्यास्तु पृथक्त्वं नत्वन्योन्याभावइति
वाच्यं रूपं न घटइति प्रतीत्यनापत्तेः न हि रूपे घटावधिकं
पृथक्त्वं गुणान्तरमस्ति न वा घटे घटावधिकपृथक्त्वमस्ति येन
परस्परासम्बन्धः कल्प्यइत्यतआह अन्योन्याभावइति।
विलक्षणेति ननु भेदवैलक्षण्यमेव नत्वर्थवैलक्षण्यमिति चेन्न
द्वितीयार्थभेदं घटात् पृथक्त्वमितिवत् घटोनेत्यत्रापि पञ्चमी स्यात्
तस्मात् यदर्थकयोगे पञ्चमी सोऽर्थोनञर्थोऽन्योन्याभावतो
भिन्नोगुणान्तरं कल्प्यतइति। संयोगं निरूपयति अप्राप्त्यो
रिति तं विभजते कीर्त्तितइति एषसंयोगः सन्निपातः संयोगा
द्वितीयः उभयकर्मजः तृतीयइति संयोगमइत्यर्थः तृती
यः स्यादिति पूर्वेणान्वितं आद्यिमः अभिघातः द्वितीयो नोद
नाख्यः संयोगइति। विभक्तप्रत्ययकारणं विभागं निरूपयति
विभागइति एककर्मेति उदाहरणन्तु श्येनयोर्विभागा
दिकं पूर्ववद्बोध्यं तृतीयः विभागजः कारणमात्रविभागजन्यः
कारणाकारणविभागजन्यस्येति आद्यवत् यच्च कपाले कर्म

नाः कपालद्वयविभागः ततो घटारम्भकसंयोगनाशः ततो घटनाशः ततस्तेन एककपालविभागेन स्वकर्मणा कपालस्य देशान्तरविभागोजन्यते ततउत्तरदेशसंयोगः ततः कर्म नाशइति न च तेन कर्मणैव कथं देशान्तरविभागो न जन्यत इति वाच्यं एकस्य कर्मणआरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य अनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वविरोधात् अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात् तस्मादवयवी अनारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत् तदा आरम्भक संयोगप्रतिद्वन्द्विविभागं न जनयेत् न च कारणविभागमेव द्रव्यमात्पूर्व्वं कुतोदेशान्तरविभागेन जन्यतइति वाच्यं आरम्भ कसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरवि भागासम्भवात् यत्र हस्तक्रियया हस्ततरुविभागः ततः शरी रेऽपि विभक्तप्रत्ययोभवति तत्र च शरीरतरुविभागे हस्तक्रि या न कारणं वधिकरणत्वात् शरीरे तु क्रिया नास्ति अवयवि कर्मणोऽवयवकर्मनियतत्वात् अतस्तत्र कारणाकारण विभागेन कार्य्याकार्य्यविभागोजन्यतइति अतएव विभागो गुणान्तरं अन्यथा शरीरेविभक्तप्रत्ययोन स्यात् अतः संयोग नाशेन विभागोनान्यथासिद्धोभवति परापरव्यवहारनिमित्ते परत्वापरत्वेनिरूपयति इदंपरमस्मादपरमिति दैशिकमिति दैशिकपरत्वं वक्तरसूर्य्यसंयोगान्तरितत्वज्ञानादुत्पद्यते एवं तद्भ्रातृत्वस्य ज्ञानादपरत्वमुत्पद्यते अत्र अवधित्वार्थदृतीयापेक्षा यथा पाटलिपुत्रात् काञ्चीमपेक्ष्य प्रयागः परः पाटलिपुत्रात् कुरु

क्षेपमपेक्ष्य प्रयागेऽपरदृति तयोर्दैशिकपरत्वाकरणयोरसम
र्थो असमवायिकारणं तदाश्रये दैशिकपरत्वापरत्वाश्रये।
दिवाकरेति अत्र परत्वं अपरत्वञ्च कालिकं ग्राह्यं यस्य सूर्य्य
परिस्पन्दापेक्षया यस्य सूर्य्यपरिस्पन्दोऽधिकः स ज्येष्ठः यस्य
न्यूनः स कनिष्ठः कालिकपरत्वापरत्वे जन्यद्रव्यएव अत्र कालिक
परत्वापरत्वयोः तेषां कालिकदैशिकपरत्वापरत्वानां। क्रम
प्राप्तां बुद्धिं निरूपयितुमाह बुद्धेरिति। अप्रमां निरूपयति तत्
शून्यदृति तदभाववति तत्प्रकारकं ज्ञानं भ्रमदृत्यर्थः तत्प्रपञ्चः
अप्रमाप्रपञ्चः आद्यदृति विपर्य्यासदृत्यर्थः शरीरादौ यदा
त्मकप्रकारकं ज्ञानं गौरोऽहमित्याकारकं एवं शङ्खादौ पीतः
शङ्खदृत्याकारकं यज्ज्ञानं निश्चयरूपं तद्भ्रमदृति किंस्विदिति
वितर्कं निश्चयस्य लक्षणमाह तदभावेति तदभावाप्रकारकत्वे
सति तत्प्रकारकं ज्ञानं निश्चयः। संशयं लक्षयति संशयदृति एक
धर्म्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशयदृत्यर्थः। साधा
रणेति उभयसाधारणोयोधर्म्मस्तज्ज्ञानं संशयकारणं यथा
उच्चैस्त्वं स्थाणुत्वसाधारणं ज्ञात्वा अयं स्थाणुर्नवेति सन्दिग्धे
एवं असाधारणज्ञानं कारणं यथा शब्दत्वं नित्यानित्यवृ
त्तं शब्दे गृहीत्वा शब्दोनित्योन वेति सन्दिग्धे विप्रतिपत्ति
स्तु शब्दोनित्योन वेत्यादि शब्दात्मिका न संशयकारणं शब्द
व्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वाभाव्यात् किन्तु तच्च
शब्देन कोटिद्वयज्ञानं जन्यते संशयस्तु मानसएवेति एवं ज्ञाने
प्रामाण्यसंशयादिषयसंशयदृति एवं व्याप्यसंशयादपि व्यापक

Digitized by Google

संशयरत्यादिकं बोध्यं किन्तु संशये धर्मिज्ञानंधर्म्यिन्द्रियसन्नि
कर्षो वा कारणमिति दोषः अप्रमां प्रति दोषः कारणं प्रमां
प्रति गुणः कारणं तत्रापि पित्तादिरूपादोषाश्रननुगताः
तेषां कारणत्वं अन्वयव्यतिरेकाभ्यामेव सिद्धं गुणस्य प्रमाजन
कत्वन्तु अनुमानात् सिद्धं यथा प्रमाज्ञानसाधारणकारणभिन्न
कारणजन्याजन्यज्ञानत्वात् अप्रमावत् न च दोषाभावएव
कारणमस्तिति वाच्यं पीतः शङ्ख इति ज्ञानस्थले पित्तदोषस्य
त्वात् शङ्खप्रमानुत्पत्तिप्रसङ्गात् विनिगमनाविरहात् अनन्त
दोषाभावस्य कारणत्वमपेक्ष्य गुणकारणतायान्याय्यत्वं न च
गुणसत्त्वेऽपि पित्तप्रतिबन्धात् शङ्खे न वैत्यज्ञानमतः पित्तादि
दोषाभावानां कारणत्वमवश्यं वाच्यं तथाच किं गुणस्य हेतु
त्वकल्पनवेति वाच्यं तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्व
सिद्धेः एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वाच्च
तत्र दोषाः के इत्याकाङ्क्षायामाह पित्तेति क्वचित्पीतादिभ्रमे
पित्तं दोषः क्वचित् चक्षुरादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः
क्वचिच्च वंशीरवभ्रमे मण्डूकवसाञ्जनमित्येवं दोषाभ्रान्ति
जनकादित्यर्थः। अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रम
शोगुणान् दर्शयति प्रत्यक्षेति प्रत्यक्षे विशेषणवत् विशेष्यसन्नि
कर्षोगुणः अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुणइति
एवमग्रेऽप्यूह्यः। प्रमां निरूपयति भ्रमभिन्नमिति ननु यच्च शुक्ति
रजतयोरिमे रजते इति ज्ञानं जातं तच्च रजतांशेऽपि प्रमा
न स्यात् तज्ज्ञानस्य भ्रमभिन्नत्वाभावात् अतआह अथवेति त

दंदिशेष्यकं तत्प्रकारकं ज्ञानं प्रमेत्यर्थः। दृदंनु बोधनेन सम्बन्धेन तदत्ता तेन सम्बन्धेन तदंदिशेष्यकं तेन सम्बन्धेन तत्प्रकारकत्वं वाच्यं तेन कपालादौ संयोगादिना घटादिज्ञानेऽति व्याप्तिः एवं सति निर्विकल्पकं प्रमा न स्यात् तस्य तत्प्रकारकत्वाभावात् अतआह न प्रमेति ननु वृक्षे कपिसंयोगज्ञानं भ्रमः स्यात् प्रमा च स्यादिति चेन्न प्रतियोगिव्यधिकरणसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात् न च वृक्षे संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानं भ्रमोन स्यात् तत्र संयोगाभावस्य प्रतियोगिव्यधिकरणत्वादिति वाच्यं तत्र संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् लक्षणस्यानुगमात् लक्षणानुगमेऽपि न क्षतिः। प्रमात्वमिति मीमांसकादि प्रमात्वं स्वतोग्राह्यमिति वदन्ति तच्च गुरूणां मते ज्ञानस्य स्वप्रकाशरूपत्वात् तज्ज्ञानप्रामाण्यं तेनैव गृह्यते इति भट्टानां मते ज्ञानमतीन्द्रियं ज्ञानजन्या ज्ञातता प्रत्यक्षा तया च ज्ञानमनुमीयते मुरारिमिश्राणां मते ऽनुव्यवसायेन ज्ञानं गृह्यते सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानं प्रामाण्यं गृह्यते विषयनिरूप्यं हि ज्ञानं अतोज्ञानविशिष्टवैशिष्ट्यविषयः तन्मतं दूषयति न स्वतोग्राह्यमिति। संशयेति यदि ज्ञानप्रामाण्यं स्वतोग्राह्यं स्यात् तदाभ्यासदशोत्पन्नज्ञाने तत्संशयो न स्यात् तत्रहि यदि ज्ञानं ज्ञातं तदा प्रामाण्यं ज्ञातमेव इति कथं संशयः यदि तु ज्ञानं न ज्ञातं तदा धर्मिज्ञानाभावात् कथं संशयः तस्मात् ज्ञानप्रामाण्यं अनुमेयं तथाहि इदं

ज्ञानं प्रमा घटादिप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं यथाऽप्रमा इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा गन्धवति पृथिवीत्वप्रकारक ज्ञानत्वात् एवं इदं जलज्ञानं प्रमा स्नेहवति जलत्वप्रकारक ज्ञानत्वात् नच हेतुज्ञानं कथं जातमिति वाच्यं पृथिवीत्वप्रकार कत्वस्य स्वतोग्राह्यत्वात् नच गन्धवद्विशेष्यकत्वस्यापि सुग्रहत्वात् तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते संशयानु रोधात् न च प्रमात्वस्य साध्यत्वे प्रसिद्धिः कथमिति वाच्यं इदं ज्ञानप्रमात्वस्य स्वतोग्राह्यत्वात् न च प्रकारभेदेन प्रामाण्य भेदात् घटत्ववति घटत्वप्रकारादेः कथं प्रसिद्धिरिति वाच्यं घटत्वप्रकारकत्वस्य स्वविशेष्यकत्वस्य च स्वतोग्राह्यत्वात् घट स्य च पूर्वमुपस्थितत्वात् घटविशेष्यकं घटत्वप्रकारकमिति ज्ञाने प्रामाण्यस्य बाधकाभावः व्यवसायपरन्तु प्रामाण्यग्रहं गृह्णाति तत्र संशयसामग्रीसत्त्वे संशयस्यैवोपयोगः किञ्चाभ्यास दशायां तृतीयानुव्यवसायादिना प्रामाण्यस्य स्वतएव ग्रहसम्भ वात् प्रथमानुव्यवसायपरं न तद्ग्राहकत्वमिति कल्प्यते संशया नुरोधात्। अत्र प्रामाण्यानुमितौ प्रामाण्यग्रहे न तस्य विषय निश्चयरूपत्वार्थं तत्र प्रामाण्यग्रहोवाच्यः सोऽप्यनुमित्यन्तरे णेति। फलमुखो कारणमुखो वा ग्रामवत्तेति चेन्न अगृहीता प्रामाण्यग्रहकस्यैव निश्चयरूपत्वात् यत्र च प्रामाण्यसंशयस्य चैव परं प्रामाण्यानुमितेरपेक्षायामग्रहं प्रामाण्यानुमिति रित्यतएव सर्वत्र तु न संशयः क्वचित्तोयमुपस्थितेः क्वचिद्वि शेषदर्शनादितः क्वचिदिषयान्तरसञ्चारादिति संक्षेपः। ननु

सर्वेषां ज्ञानानां यथार्थत्वात् प्रमात्वरूपे तद्विशेषकत्वं विशेषणं व्यर्थं न च रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात् तव मते भ्रमत्वाभावादिति वाच्यं तथा हि दोषाधीनस्य पुरोवर्त्तिनि स्वतश्चोपस्थितरजतभेदाग्रहस्य हेतुत्वात् सत्यरजतस्थले तु विशिष्टज्ञानस्य यथात् तदेव कारणमस्तु वा तथापि भेदाग्रहएव कारणमिति गवाऽन्यथाख्यातिः यथार्थत्वे रजतप्रत्यक्षकारणस्य रजतसन्निकर्षस्याभावात् रङ्गे रजतबुद्धेरनुपपत्तेरिति चेन्न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः कृप्तत्वात् अन्यत्रापि तत्कल्पनात् न च यत्राद्यप्रवृत्तौ तत्कारणं विलम्बादिप्रवृत्तौ तु भेदाग्रहः कारणमिति वाच्यं लाघवात् प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् इत्थञ्च रङ्गे रजतत्वविशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणा प्रत्यासत्तिकल्पनेऽपि न क्षतिः फलमुखगौरवस्यादोषत्वात् किञ्च रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं जातं तत्र न कारणबाधोऽपि। अपिच यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती स्यातां रङ्गे रङ्गभेदाग्रहे रजते रजतभेदाग्रहे अन्यथाख्यातिभयात् तस्मात् रङ्गे रङ्गभेदाग्रहस्य रजते रजतभेदाग्रहस्य च यथात् दोषादेव रङ्गे रजतभेदाग्रहस्य रजते रङ्गभेदाग्रहस्य च यथात्। किञ्चानुमितिं प्रति भेदाग्रहस्य हेतुत्वे जलह्रदे वह्निव्याप्यधूमवद्भेदाग्रहात् अनुमितिर्निर्बाधा यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वह्निव्याप्यधूमज्ञानं अनुमित्यनुरोधादापतितं इत्थं अन्यथा

व्यक्तौ प्रत्यक्षमेव प्रमाणं रङ्गे रजतत्वेन ज्ञानमीत्यनुभवा
दिति संक्षेपः। पूर्वं व्याप्तिरुक्ता तद्ग्रहोपायस्तु न दृष्टिरत्व
लक्षं दर्शयति व्यभिचारेति व्यभिचाराग्रहः सहचार
ग्रहस्य व्याप्तिग्रहे कारणमित्यर्थः व्यभिचाराग्रहस्य व्याप्तिग्रह
प्रतिबन्धकत्वात् तदभावः कारणं अन्वयव्यतिरेकाभ्यां सह
चारग्रहस्यापि हेतुता भूयोदर्शनन्तु न कारणं व्यभिचारा
ग्रहौ सत्यां सहदर्शनेऽपि क्वचिद्व्याप्तिग्रहात् क्वचिद्व्यभिचारग्रहा
विधूमनदारा भूयोदर्शनमुपयुज्यते यच्च तु भूयोदर्शनादपि
ग्रहो नापैति तच्च विपक्षबाधकतर्कोऽपेक्षितः तथापि वह्नि
विरहिण्यपि धूमः स्यादिति यद्याग्रहो भवति तदा सा वह्नि
धूमयोः कार्यकारणभावस्य प्रतिबन्धान्निवर्त्तते यद्ययं
वह्निमान् स्यात्तदा धूमवान् न स्यात् कारणं विना कार्यो
नुपपत्तेः यदि क्वचित् कारणं विनापि भविष्यति अहेतुकएव
वा भविष्यतीति तच्चाग्रहो भवति तदा सा व्याघाताद्यपसर
णीया यदि कारणं विना कार्यं स्यात् तदा धूमार्थं वह्नेस्तृप्त्यर्थं
भोजनस्य नियमतउपादानं तच्चैव न स्यादिति यच्च खतएव
ग्रहो नावतरति तच्च न तर्कापेक्षापीति तदिदमुक्तं तर्कः क्वचित्
ग्रहान्निवर्त्तकइति। इदानीं परकीयव्याप्तिग्रहप्रतिबन्धार्थं
मुपाधिं निरूपयति साध्यस्येति साध्यत्वाभिमतव्यापकत्वे सति
साधनत्वाभिमताव्यापकत्वमित्यर्थः ननु श्यामोमित्रतनयत्वात्
इत्यत्र माकमाकजत्वं नोपाधिः स्यात् तस्य साध्यव्यापकता
भावात् श्यामत्वस्य घटादावपि सत्त्वात् एवं वायुः प्रत्यक्षः

सर्वमन्यत्वात् इत्यत्र उद्भूतरूपवत्त्वं साध्यं स्यात् प्रत्यक्ष लक्षणादिषु क्षणात् तत्र रूपाभावात् एवं ध्वंसोविनाशी जन्यत्वात् इत्यत्र भावत्वं साध्यं स्यात् निरवयवे क्षणात् तत्र च भावत्वाभावादिति चेन्न यद्भूयावच्छिन्नसाध्य व्यापकत्वं तद्भूयावच्छिन्नसाधनाव्यापकत्वमित्यर्थलाभात् मिश्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं शाकपाकजत्वं एवं बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकत्वमुद्भूतरूपवत्वं बहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकत्व एवं ध्वंसोविनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकत्वं भावत्वं काकः श्यामो मित्रातनयत्वात् इत्यादावपि मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकत्वं शाकपाकजत्वं सद्धेतौ तु एतादृशोधर्मोनास्ति यदवच्छिन्नस्य साध्यस्य व्यापकं तदवच्छिन्नस्य साधनस्याव्यापकं किञ्चित् स्यात् व्यभिचारिणि तु अन्तत उपाधिकरणं यत्साध्याधिकरणं यद्वोपाधिशून्यं साध्यव्यभिचारनिरूपकमधिकरणं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वं साधनस्य चाव्यापकत्वमुपाधेः सम्भवतीति अतएव सत्त्वमपि रूपमे तदनुसारेण दर्शयति सर्वमिति स्वसाध्येति स्वं उपाधिः स्वस्य साध्यञ्च स्वसाध्ये तयोर्व्यभिचारितादित्यर्थः। उपाधेर्दूषकता बीजमाह व्यभिचारीत्येति उपाधिव्यभिचारेण साध्यव्यभिचारानुमानं उपाधेः प्रयोजनमित्यर्थः तथाहि यत्र शुद्धसाध्य व्यापक उपाधिस्तत्र शुद्धेनोपाधिव्यभिचारेण साध्यव्यभिचारानुमानं यथा धूमवान् वह्नेरित्यादौ वह्निर्धूमव्यभिचारी

आर्द्रेन्धनव्यभिचारित्वात् इति व्यापकव्यभिचारिणोव्याप्यव्यभिचारावश्यकत्वात् यच्च तु किञ्चिद्धर्मावच्छिन्नसाध्यव्यापक उपाधिः तच्च तद्धर्मवति उपाधिव्यभिचारेण साध्यव्यभिचारानुमानं यथा श्यामोमित्रातनयत्वात् इत्यत्र मित्रातनयत्वं श्यामत्वव्यभिचारि मित्रातनये शाकपाकजत्वव्यभिचारित्वादिति साधनुमीतपक्षेतरस्तु साध्यव्यापकतायाहकप्रमाणाभावात् स्वव्याप्यानकत्वाच्च नोपाधिः साधोऽनुमीतस्तु पक्षेतर उपाधिर्भवत्येव यच्च वह्निरनुष्णः कृतकत्वात् इत्यादौ प्रत्यक्षेण वह्नेरुष्णत्वग्रहे वह्नीतरत्वमुपाधिः यच्च साध्यव्यापकत्वादिकं सन्दिग्धं तत् सन्दिग्धोपाधिः पक्षेतरस्तु सन्दिग्धोपाधिरपि नोद्भावनीयः कथकसम्प्रदायानुरोधादिति केचित्तु सप्रतिपक्षोत्थापनमुपाधिफलं तथाहि अयोगोलकं धूमवद्वह्नेरित्यादौ अयोगोलकं धूमाभाववत् आर्द्रेन्धनाभावात् इति सप्रतिपक्षसम्भवात् इत्यत्र साधनव्यापकोऽपि क्वचिदुपाधिर्यथा करका पृथिवी कठिनसंयोगवत्त्वादित्यादौ अनुष्णाशीतस्पर्शवत्त्वं नचाच स्वरूपसदुपाधिरेव दूषणमिति वाच्यं सर्व्वोपाधेर्दूषणान्तरसाङ्कर्य्यादत्र च साध्यव्यापकपक्षावृत्तिरुपाधिरिति वदन्ति। अथोपमानयोरिति वैशेषिकाणां मते प्रत्यक्षमनुमानञ्च प्रमाणं अथोपमानयोरनुमानविधयैव प्रामाण्यं तथाहि दण्डेन गामभ्याजेत्यादिपदानि वैदिकपदानि वा तात्पर्य्यविषयीभूतपदार्थसंसर्गज्ञानपूर्व्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वात् घटमानपदेति पदकदम्बवत् यद्वा एते पदार्थाभिथःसंसर्गवन्तः योग्यतादिम

व्यदोषस्यापि निश्चयात् ताहशपदार्थवत् इष्टाबोऽपि इष्टाभाव
रेव साध्यसिद्धिरिति एवं गगनेऽप्रसिद्धत्यज्ञानान्तरं यत्रापदं
गगनवत्प्रवृत्तिनिमित्तकं अपदत्वात् इष्टवत्कारि इष्टैव प्रवृत्तिरापद
त्वात् यद्वा गोपदं गोत्वप्रवृत्तिनिमित्तकं पदत्वात् गगनपदं तत्र
वृत्तिनिमित्तकं शक्त्युपदत्वात् इत्यनुमानेन गोत्वभङ्गप्रसङ्गात्
अवयवप्रवृत्तिनिमित्तकं आवयवे तन्मात्रं दूषयति तत्र प्रम
मिति विना व्याप्तिज्ञानं प्रमाद्यनौचित्यात्तदुभयविकलात् अप्रि
सर्व्वत्र प्रमत्वप्रसङ्गात्तत्करं व्याप्तिज्ञानं अनवस्थेति किञ्च
सर्व्वत्र प्रमत्वेऽपि यदि व्याप्तिज्ञानं कल्प्यते तर्हा सर्व्वत्रानुमिति
त्वेऽपि पक्षज्ञानं कस्मादिष्यते प्रमाद्यौचित्यमेव किं न स्वीक्रियते इति
दैविध्यमिति अनुमानं हि त्रिविधं केवलान्वयि केवलव्यतिरेकि
अन्वयव्यतिरेकिभेदात् तत्राद्यस्य: केवलान्वयी यथा शब्दो
अभिधेयादित्यादौ तत्र हि सर्व्वस्यैव शब्दत्वात् विपक्षाभावत्वं
नतु सर्व्वेषां धर्म्माणां व्याप्यत्वात् केवलान्वयिसिद्धिरिति चेन्न
व्याप्यत्वस्य सर्व्वसाधारणे नखेव केवलान्वयित्वात्। किञ्च
वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं तच्च गगना
दावप्रसिद्धं असत्सपक्षः केवलव्यतिरेकी यथा पृथिवीतर
भेदोभिधेये गन्धवत्त्वादित्यादौ तत्र हि जलादिरयोऽप्रसि
द्धस्य पूर्व्वमनिश्चिततया निश्चितसाध्यतः सपक्षस्याभावइति।
सत्सपक्षविपक्षोऽन्वयव्यतिरेकी यथा वह्निमान् धूमादित्यादौ
तत्र सपक्षस्य महानसादेर्विपक्षस्य जलह्रदादेश्च सत्त्वादिति।
तत्र व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं तदर्थं व्यतिरेक

[illegible] निश्चिनोति यत्राभावस्याबाधकत्वं हेत्वभावस्य बाधकत्वं इति।
साध्याभावव्यापकीभूताभावप्रतियोगिसमसिद्धयर्थः अयमेवं बोध्यं
येन सम्बन्धेन यत्र येन रूपेण व्यापकता दृश्यते तत्सम्बन्धाव
च्छिन्नप्रतियोगिताकतदूर्ध्वावच्छिन्नाभाववत्ताज्ञानात् यत्र
सम्बन्धेन यदूर्ध्वावच्छिन्नं प्रति व्यापकता दृश्यते तत्सम्बन्धावच्छिन्न
प्रतियोगिताकतदूर्ध्वावच्छिन्नाभावस्य सिद्धिः इत्यत्र यत्र
विशेषवत्ताद्यवगमेनेतरव्यापकत्वं तत्राभावे दृश्यते तत्र
ज्ञानाभावादनेतरेतराश्रयाभावः सिध्यति यत्र तु ताद्दशव
सम्बन्धेनेतरव्यापकता दृश्यते तत्र ताद्दशसम्बन्धेनेतरव्या
भावः सिध्यति यद्वा योग्याभावः एवं यत्र संयोगसम्बन्धेन
धूमं प्रति संयोगसम्बन्धेन वह्नेर्व्यापकता दृश्यते तत्र संयोग
सम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावेन अवच्छेदे संयोग
सम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिध्यति अत्र च
व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणं केचित्तु
व्यतिरेकसहचारेऽन्वयव्याप्तिरेव गृह्यते न तु व्यतिरेकव्याप्ति
ज्ञानं कारणं यत्र व्यतिरेकसहचाराग्राह्यिग्रहस्तत्र व्यतिरे
कोत्पद्यते यत्रत्वप्रतिक्षिप्तु घटादावेव ज्ञायतां तस्मात् इति
कीलावच्छेदेन बाधते इति वदन्ति। अर्थापत्तेरिति अर्था
पत्तिं प्रमाणान्तरं मन्यमानं केचन तत्राहि यत्र देवदत्तस्य गृहे
दर्षजीविलं श्रोतिःग्रामादवगतं दीर्घिनोगृहाभावस्य ग्रामादा
दवगतं तत्र गृहदर्षजीविलान्यथानुपपत्त्या यद्दिः यत्र कल्प्यते
तद्नुमानेन मानार्थत्वमेष्यते तत्राहि दीर्घिलस्य यद्दिः यत्र

Digitized by Google

गृहसत्त्वान्यतरव्याप्यत्वं गृहीतं तचान्यतरसिद्धौ बाधमानायां गृहसत्त्वबाधादहिःसत्त्वमनुमितौ भासते एवं पीनोदेवदत्तो दिवा न भुङ्क्ते इत्यादौ पीनत्वस्य भोजनव्याप्यत्वावगमाद्भोजनं सिध्यति दिवाभोजनबाधे रात्रिभोजनं सिध्यति अभावप्रत्यक्षस्यानुभविकत्वादनुपलब्धोऽपि न प्रमाणान्तरं किन्त्वनुपलब्धिरेव स्वाज्ञानस्य हेतुत्वे ज्ञानाकरणकत्वात् प्रत्यक्षत्वं ज्ञानस्य हेतुत्वे तु तत्राप्यनुपलब्ध्यन्तरापेक्षेत्यनवस्था चेष्टापि प्रमाणान्तरं न तस्याः सङ्केतग्राहकशब्दस्मारकत्वेन शिष्यादिसमभीव्याहृतशब्दएवान्तर्भावात् यत्र तु व्याप्त्यादिग्रहस्तत्रानुमितिरेवेति। सुखं निरूपयति सुखन्तु जगतामेव काम्यं धर्मेण जन्यते इति काम्यमभिलाषविषयः। धर्मेति धर्मत्वेन सुखत्वेन कार्यकारणभाव इत्यर्थः। दुःखन्निरूपयति अधर्मेति अधर्मत्वेन दुःखत्वेन कार्यकारणभाव इत्यर्थः। प्रतिकूलमिति दुःखज्ञानादेव सर्वेषां स्वाभाविकविषय इत्यर्थः। इच्छां निरूपयति निर्दुःखत्वइति इच्छा हि फलविषयिणी उपायविषयिणी च फलन्तु सुखं दुःखाभावश्च तच फलेच्छां प्रति फलज्ञानं कारणं अतएव खतः पुरुषार्थः सम्भवति यज्ज्ञानं सत्सवृत्तितयेष्यते सपुरुषार्थइति तल्लक्षणात् इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः उपायेच्छां प्रतीष्टसाधनताज्ञानं कारणं। चिकीर्षेति कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा पाकं कृत्वा साधयामीति तदनुभवात् चिकीर्षां प्रति कृतिसाध्यताज्ञानमिष्टसाधनताज्ञानञ्चकारणं अतएव तृष्णां कृतिसाध्यता

भावान्न चिकीर्षा। बलवदिति बलवदिष्टसाधनताज्ञानं तच्च प्र तिबन्धकमतोमधुविषसंपृक्तान्नभोजने न चिकीर्षा बलवद्द्वेषप्र तिबन्धकत्वन्ये कस्यचिन्मतदति बलवदनिष्टाजनकत्वज्ञानं कारणमित्यर्थः क्षतिसाध्यताज्ञानादिमता बलवदनिष्टसा धनताज्ञानशून्यस्य बलवदनिष्टाजनकत्वज्ञानं विनापि चिकी र्षाया विरहाभावात् कस्यचिन्मते इत्यरसोद्गितः। द्वेषं निरूपयति दिष्टसाधनतेति दुःखे पापविषयकं द्वेषं प्रति दिष्ट साधनताज्ञानं कारणमित्यर्थः बलवदिष्टसाधनताज्ञानञ्च प्र तिबन्धकं तेन मान्त्रीयकदुःखजनके पाकादौ न द्वेषः। यत्नं निरूपयति प्रवृत्तिरिति प्रवृत्तिनिवृत्तिजीवनयोनियत्न भेदा त् प्रयत्नस्त्रिविधइत्यर्थः। चिकीर्षेत्यादि मधुविषसंपृक्तान्नभोज नादौ बलवदनिष्टानुबन्धित्वेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः क्षतिसाध्यताज्ञानादिवदबलवदनिष्टाननुबन्धित्वज्ञानम पि स्वतन्त्रान्वयव्यतिरेकात् प्रवृत्तौ कारणमित्यपि वदन्ति। कार्य्यताज्ञानं प्रवर्त्तकमिति गुरवः तथाहि ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितमस्ति साचक्षतिसाध्यता ज्ञानसाध्या इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात् चिकीर्षा हि क्षतिसाध्यत्वप्रकारिकेच्छा तच्च क्षतिसाध्यत्वं प्रका रत्वप्रकारकज्ञानं चिकीर्षायां तद्द्वारा प्रवृत्तौ च हेतुः न त्विष्टसाधनताज्ञानं तच्च हेतुः क्षत्यसाध्येऽपि प्रवृत्त्यापत्तेः क्षत्य साध्यताज्ञानं प्रतिबन्धकमिति चेन्न तदभावापेक्षया क्षतिसा ध्यताज्ञानस्य लघुत्वात् नच द्वयोपरि हेतुत्वं गौरवात् ननु

Digitized by Google

सम्भवतीति चेन्न दृष्टसाधनत्वमप्राप्य तादृशकार्य्यताज्ञानं यदर्थेऽपि प्रवृत्तेरसम्भवात् यदपि पञ्चापूर्व्वफलमिति तदपि न कामनाभावे करणापत्तेरौक्तात् कामनाकल्पने लार्थवादिकफलमेव रात्रिसत्रन्यायात् कल्पतामन्यथा प्रवृत्त्यनुपपत्तेः तेन श्रनुत्पत्तिं तथाचान्ये प्रत्यवायस्य मन्यते। एवं सन्ध्यामुपासते ये तु सततं संशितव्रताः विधूतपापास्ते यान्ति ब्रह्मलोकमनामयं। एवं दर्शादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्नित्यादिकमेव फलमस्तु न च पितृप्रीतिः कथं फलं व्यधिकरणत्वादिति वाच्यं गयाश्राद्धादाविव उद्देश्यस्य सम्बन्धेनैव फलजनकत्वस्य क्वचित्कल्पनात् यतएवोक्तं प्राक् दर्शितफलमनुष्ठानरोत्युत्सर्गदृति पितृणां मुक्तले तु स्वस्य स्वर्गफलं यावज्जीवनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गफल कल्पनात् पञ्चापूर्व्वार्थप्रवृत्तिस्तु न संभवति। न हि तत्सुख दुःखाभाववत्त्वतः पुरुषार्थः नवा तत्साधनं प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेदित्थं यथा हि नित्यश्रुते प्रत्यवाया भावस्तिष्ठति तदभावे तदभावः। एवं प्रत्यवायाभावस्य सत्त्वे दुःखप्रागभावसत्त्वं तदभावे तदभावदृति- योगक्षेमसाधारण कारणतायादुःखप्रागभावं प्रत्यपि सुवचत्वात् एवमेव प्राय श्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति ननु न कलञ्जं भक्षयेदि त्यत्र विध्यर्थे कथं नञर्थान्वयः दृष्टसाधनत्वाभावस्य श्रुति साध्यत्वाभावस्य च बोधयितुमशक्यत्वादिति चेन्न तत्र बाधा दिष्टसाधनत्वं श्रुतिसाध्यत्वञ्च न विध्यर्थः किन्तु बलवदनिष्टा

अनुबन्धिनिवर्त्यं तद्भावस्य यज्ञो नेष्यते अथवा यज्ञवदनिष्टा
नुबन्धीष्टसाधनत्वे सति कृतिसाध्यत्वं विध्यर्थः तद्भावस्य
यज्ञानेष्यमानोविहितोभावोविशेष्यवति विशेषणाभावे विशेष्य
ति मनु श्येनमभिचरन् यजेतेत्यत्र कथं यज्ञवदनिष्टानुबन्धि
त्वमर्थः श्येनस्य मरणानुकूलव्यापारत्वं हिंसात्वेन नरकसाधन
त्वात् न च वैधत्वाविशेषादिति वाच्यं अभिचारे प्रायश्चित्तोपदे
शात् न च मरणानुकूलव्यापारत्वं यदि हिंसा तदा सङ्कल्प
रूप कूपकर्तुरपि हिंसकत्वापत्तिः गवालम्भादावपि तत्त्वमाह
श्रौतस्मार्तावधिलाभक्रियेति वाच्यं सत्रोहेमकालस्थापि विधि
शेषत्वात् अतएव सप्तदशीनेत्राभ्यङ्गस्य न हिंसात्वं अन्योहि
प्रकल्पितमारणाद्यहृतमाज्ञातस्य तु वाजपेयं प्राजापत्यमिति
श्येन श्येनवारणाद्यहृतारकत्वेन विशेषणात् अतएव काम्ये
मरणार्थकनमिचपूजादेरपि न हिंसात्वं न च साक्षान्मरण
जनकस्यैव हिंसात्वं श्येनस्तु न तथा किन्तु तज्जन्यापूर्वमिति
वाच्यं यज्ञादावेव आक्षेपे प्रसङ्गपरम्परया हृते हिंसाला
पत्तेः। केचित्तु श्येनस्य हिंसाफलं न तु मरणं श्येनजन्यस्य
घातादिरूपा हिंसा अभिचारपदार्थः तस्य च पापजनकत्वं
अतः श्येनस्य वैधत्वात् पापजनकत्वेऽपि अग्निपापं प्रतिबन्धा
य यज्ञोन प्रवर्त्तते आचार्यास्तु आत्मभिन्नाघोविधर्थः पापं
कुर्य्यादित्यादौ आत्मानिष्टेच्छावच्चिकीर्षितेच्छाया
श्चितं साधयत् एवस्य स्वर्गकामोयजेतेत्यादौ रागः स्वर्गकाम
कृतिसाध्यतायाश्चोदकार्थः तत्साधनेष्टेतरेष्टसाधनत्वादिरूप

नुमाय प्रवर्त्तते कलञ्जभक्षणादौ तदभावान्न प्रवर्त्तते यस्तु वेदे पौरुषेयत्वं नाभ्युपैति तं प्रति विधिरेव तावद्भर्भदृव श्रुतिः कुमार्याः पंयोगे मानं न च कर्त्तृस्मरणं बाधकं कपिलकणादादिकमारभ्याद्यपर्य्यन्तं कर्तृस्मरणस्यैव प्रतीयमानत्वात् अन्यथा स्मृतीनामप्यकर्तृकत्वापत्तेः तत्रैव कर्तृस्मरणमस्तीति चेद्देदेऽपि छन्दांसि जज्ञिरे तस्मादित्यादि कर्तृस्मरणमस्त्येव एवं प्रति मन्वन्तरं चैषा श्रुतिरन्या विधीयतइत्यपि द्रष्टव्यं स्वयम्भुरेषभगवान् वेदोगीतस्त्वया पुरा। शिवाद्याऋषिपर्य्यन्ताः स्मर्त्तारोऽस्य न कारकाइति तु वेदस्य स्तुतिमात्रं न च पौरुषेयत्वभ्रमादिसंभवादप्रामाण्यं स्यादिति वाच्यं नित्यसर्व्वज्ञत्वेन निर्दोषत्वात् अतएव पुरुषान्तरभ्रमादिसम्भवान्न कपिलादेः कर्त्तृत्वं वेदस्य किञ्च वर्णानामेवानित्यत्वस्य वक्ष्यमाणत्वात् सुतरां तस्य मूर्भस्य वेदस्यानित्यत्वमिति उपादानस्थेति उपादानस्य समवायिकारणस्याधत्वं प्रत्यक्षं प्रवृत्तौ कारणमिति दृष्टसाधनताज्ञानस्य दुःखसाधनविषयकनिवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकादवधारितमिति भावः। यत्नइति जीवनयोनिप्रयत्नो यावज्जीवनमनुवर्त्तते सचातीन्द्रियस्तत्र प्रमाणमाह शरीरे प्राणसञ्चारकारणं तत्प्रयत्नकीर्त्तितमिति प्राणसञ्चारोहि अधिकः श्वासादिः प्रयत्नसाध्यः दृश्यत्वं प्राणसञ्चारस्य यत्नसाध्यत्वानुमानात् प्रत्यक्षयत्नस्य बाधाच्चातीन्द्रियत्नसिद्धिः सएव जीवनयोनिप्रयत्नः। गुरुत्वं निरूपयति अतीन्द्रियमिति अनित्ये द्व्यणुकादौ तन्नास्ति गुरुत्वं अनित्यं नित्ये परमाणौ नित्यं गुरुत्व

नित्यमनुवर्त्तते तद्द्रवत्वं असमवायि असमवायिकारणं पतने आद्यपतने इत्यर्थः। द्रवत्वनिरूपयति सांसिद्धिकमिति द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकञ्चेति द्वितीयं नैमित्तिकं परमाण्वादिति जलपरमाणौ द्रवत्वं नित्यं अन्यच्च पृथिवी परमाण्वादौ जलद्व्यणुकादौ च द्रवत्वमनित्यं कुत्रचिन्नेत्यादि कुत्रचित्पृथिव्याञ्च नैमित्तिकं द्रवत्वं तच्च कीदृशं नैमित्तिकमित्यर्थमपेक्षते नैमित्तिकमिति वक्ष्यतीति पदमध्याहार्यं तथाच तेजःसंयोगाग्निसंयोगजन्यं नैमित्तिकं द्रवत्वं तच्च सुवर्णादिरूपे तेजसि घृतजतुप्रभृतिपृथिव्यां वर्त्ततइत्यर्थः द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तदिति हेतुरिति असमवायिकारणमित्यर्थः संग्रहे मरुदादिसंयोगविशेषे तद्द्रवत्वं स्नेहसहितमिति बोद्धव्यं तेन द्रुतसुवर्णादीनां न संग्रहः। स्नेहं निरूपयति अप्सवेत्यादि अप्स्वेवेत्यर्थः अप्सु स्नेहः ननु पृथिव्यामपि तैलस्नेहउपलभ्यते सचासौ जलीयः तथा सति दहन प्रतिकूलं स्यादतआह तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलतेति तत्प्रकर्षात् स्नेहप्रकर्षात् तैलउपलभ्यमानस्नेहोऽपि जलीयएव तस्य प्रकृष्टत्वादग्नेरानुकूल्यं अपकृष्टस्नेहं हि जलं वह्निं नाशयतीति भावः। संस्कारनिरूपयति संस्कारेति वेगस्थितिस्थापकभावनाभेदात् संस्कारस्त्रिविधइत्यर्थः मूर्त्तमात्रे तु वेगःस्यात् कर्मजोवेगजः क्वचिदिति कर्मजवेगजभेदाद्वेगोद्विविधइत्यर्थः शरादौ हि नोदनजनितेन कर्मणा वेगोजन्यते तेन च पूर्वं कर्मणाशस्तदुत्तरं कर्म एवमग्नेऽपि विनाच वेगं कर्मणः कर्म

प्रतिबन्धकत्वात् पूर्वकर्मणश्च उत्तरकर्मोत्पत्तिश्च न स्यात् च च वेगवता वायुना जनिते घटे वेगोऽजन्यते सर्वेऽजोवेगः। स्थितिस्थापकरूपे प्राक्षुष्टप्राक्षादीनां कपित्थागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात् केचिदिति चतुर्थं चित्यादिषु स्थिति स्थापकं केचिन्मन्यन्ते तदसमाधमिति भावः। यथा स्थिति स्थापकः किंचित् प्राक्षुष्टप्राक्षादौ भावनाख्यश्चेति तथा संस्कार एव उपेक्षात्मकज्ञानात् संस्कारानुत्पत्तेरुपेक्षाज्ञानाभावः स्तुत्यं तत्संप्रयोगसंस्कारानुत्पत्तिर्निश्चयश्चस्तुत्यं तेनोपेक्षाज्ञानमेव स्वयमेव संस्कारं प्रति हेतुमेति भावः। ननु स्मरणं प्रत्युपेक्षाज्ञानमिश्चयमेव हेतुमं तेनोपेक्षादिस्थले न स्मरणं इत्यं च संस्कारं प्रति ज्ञानमेवेव हेतुमाश्रिति चेन्न विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षाज्ञानमिश्चयमेव हेतुताया लिघुत्वात् किंतु उपेक्षाज्ञाने संस्कारकार्यप्रयोजकत्वात् संस्कारं प्रति तेनोपेक्षाज्ञानेन हेतुताया: लिघुत्वात् तथाप्रमाणं दर्शयति स्मरणेप्रत्यभिज्ञाजनकत्वेन हेतुरुच्यते इति यथा संस्कारः स्मरणं प्रत्यभिज्ञाजनकत्वं जनयति अतः संस्कारः कल्प्यते विना व्यापारं पूर्वानुभवस्य स्मरणादिजनकायोगात् स्मरणाद्यापारान्यतरासाध्ये कारणत्वायोगात् न च प्रत्यभिज्ञां प्रति तत्संस्कारस्य हेतुत्वेन प्रत्यभिज्ञायाः संस्कारजन्यत्वेव सिद्धिरिति वाच्यं उपेक्षाज्ञानकल्पात् परेतु प्रयुद्धसंस्कारात् प्रत्यभिज्ञानुदयादुद्बुद्धसंस्कारस्य हेतुत्वापेक्षया तत्संस्कारजन्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्पनलघुत्वात्। अहं

निरूपयति धर्माधर्मौविति स्वर्गादिसकलसुखानां स्वर्गजन्य
भोक्तृशरीरादीनाञ्च साधनं धर्मदत्यर्थः। नन्व प्रमाणदर्श
यितुमाह जनादीति यागादिव्यापारजन्या हि धर्मः करण्ये
अन्यथा यागादीनां चिरं विनष्टतया निर्व्यापारतया च कालां
तरभाविस्वर्गजनकत्वं न स्यात् तदुक्तमाचार्यैः। चिरध्वं
सस्याधार्ष्ट न कर्मणीत्यर्थं विशेषेति नन्वाशध्वंसस्यैव व्यापारः
स्यात् न च प्रतियोगितदुत्पत्तीरेकव्यापारजन्यत्वं दृष्टं तथात्वे
मानाभावात् न च तथात्वे प्रमाणमस्ति अन्यथा चरमक्षणस्य
पूर्वक्षणध्वंसस्यापि तथात्वमिति वाच्यं व्यापारविशेषस्य यदृच्छादि
त्यादित्यत आह मन्त्राद्यानेति मन्त्राद्यानस्य हि स्वर्गजनकस्यो
क्तानां जलसंयोगध्वंसानां व्यापारत्वमपेक्षैकमपूर्वं कल्प्यते
लाघवादिति भावः ननु ध्वंसोऽपि न व्यापारोऽस्तु च न निर्व्या
पारस्य चिरध्वंसस्य कर्मं कारणमिति वाच्यं यवव्यया
दिदुनिपतपूर्वमर्मिलस्य तथापि यवात् यवमदिरपूर्वमर्मिलं
मं हि पङ्क्तिसंयोगादेः कारणत्वं न तु सर्वस्य कार्यकालदृष्टिक
मिव यवादिकारणस्य कारणत्वमित्यत आह अर्थापत्त्यापि
स्वर्गादिना नाम्नस्यो मन्त्रादिति यदि हि अपूर्वेण स्वात्मना
यागजन्यस्वर्गादिना नाम्नत्वं धर्मस्य न स्यात् न हि वैदिक
मादिनाम्नः प्रतिसन्धेया कर्तुं शक्यते तस्य पूर्वमेव दृष्टत्वादि
ति एतेन देवताप्रीतिरेव फलसिद्धयर्थं मन्त्राद्यानादौ सर्वत्र
देवताप्रीतेरप्यस्थायित्वादेवताद्याराधनबलेऽपि तत्प्रीतेरनुद्देश्यत्वात्
प्रीतेः फलरूपत्वेन विष्णुप्रीत्यादौ तदप्यस्थायित्वात् अन्यसुखादे

Bayerische Staatsbibliothek München

Digitized by Google

स्वर्गाभावात् तेन विष्णुप्रीतिजन्यत्वेन परामिमतस्वर्गादिरेव विष्णुप्रीतिरूपेण स्यात्तते अधर्मोनरकादीनां हेतुर्निन्दितकर्मतदिति नरकदुःखादिसकलदुःखानां नारकिशरीरादीनाञ्च साधनमधर्मइत्यर्थः प्रमाणमाह प्रायश्चित्तादिनाशोऽसौजीवकृतीत्यिमौ गुणाविति चेदि स्यधर्मोन स्यात्तदा प्रायश्चित्तादिशास्त्रं न स्यात् न हि तेन ब्रह्महननादीनां नाशः प्रतिबन्धो वा विधातुं शक्यते नस्य पूर्व्वविनष्टत्वादिति भावः। जीवेति ईश्वरस्य धर्माधर्माभावादिति भावः इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतइति इमौधर्म्माधर्मौ वासनेति अतोज्ञानिना कृते सुकृतदुष्कृतकर्म्मणी न फलायालमिति भावः ज्ञानादपीत्यपि वा भोगपरिग्रहः ननु तत्त्वज्ञानस्य कथं धर्म्माधर्म्मनाशकत्वं नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीति वचनविरोधात् इत्यत्र तत्त्वज्ञानिना घटितेति कायव्यूहेन सकलकर्म्मणां भोगेन क्षयइति चेन्न तत्र भोगस्य वेदबोधितनाशकोपलक्षितत्वात् कथमन्यथा प्रायश्चित्तादिना कर्म्मणां नाशस्तदुक्तं ज्ञानाग्निः सर्व्वकर्म्माणीत्यादिना श्रूयते च क्षीयन्तेचास्य कर्म्माणि तस्मिन् दृष्टे परावरेइति ननु तत्त्वज्ञानिनस्तर्हि शरीरावस्थानं सुखदुःखादिकञ्च न स्यात् ज्ञानेन च सर्व्वेषां कर्म्मणां नाशादिति चेन्न प्रारब्धकर्म्मणामेव नाशात् तत्तच्छरीरभोगजनकं हि यत्कर्म्म तत् प्रारब्धं तदभिप्रायेणैव नाभुक्तमिति वचनमिति। ब्रह्मं निरूपयति ब्रह्मोध्वनिस्य वर्णस्य स्मदङ्गादिभवोध्वनिः। सर्व्वः ब्रह्मोनभोवृत्तिः श्रोत्रोत्पन्नस्य शृण्वते इति नभोवृत्तिराकाशसमवेतः शू

रत्यन्वयव्यतिरेकाभ्यां शब्दस्यायत्नजन्यत्वं सिद्धं तदाह श्रोत्रेति कण्ठसंयोगादिजन्यावर्णा त्मकादयोमतादृति ननु स्फोटरूपाद्यवच्छेदेनोत्पन्ने शब्दे श्रोत्रे कथमुत्पत्तिरतआह वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिते ति आद्यशब्दस्य बहिर्देशावच्छिन्नोऽन्यः शब्दस्तेनैव शब्दे न जन्यते तेन चापरस्यापकः एवं क्रमेण श्रोत्रोत्पन्नोवृक्षत दृति। कदम्बगोलन्यायादुत्पत्तिः कस्यचिन्मते दृति आद्यशब्दा दृग्देशेषु दशशब्दाउत्पद्यन्ते ततस्यान्ये दशशब्दाउत्पाद्यन्त दृति भावः अस्मिन् कल्पे गौरवादुक्तं कस्यचिन्मतेदृति ननु शब्दस्य नित्यत्वादुत्पत्तिः कथमतआह उत्पन्नः कोविनष्टः कदृति बुद्धेरनित्यतेति शब्दानामुत्पादविनाशप्रत्ययशालित्वा दनित्यत्वमित्यर्थः ननु सएवायं ककारदृत्यादिप्रत्यभिज्ञाना च्छब्दानां नित्यत्वं दृत्यं चोत्पादविनाशबुद्धिभ्रमरूपा चेत्यत आह सोऽयङ्कदृति बुद्धिस्तु साजात्यमवलम्बते तदेवौषधमि त्यादौ सजातीयेति दर्शनादिति तच्च प्रत्यभिज्ञानस्य तत्सजा तीयत्वं विषयः ननु तद्व्यक्तभेदोविषयः उक्तप्रतीतिविरोधात् दृत्यत्र द्वयोरपि बुद्धोर्न भ्रमत्वमिति ननु सजातीयत्वं सोऽय मिति प्रत्यभिज्ञायांभासतेदृति कुत्र दृष्टमित्यतआह तदेवेति यदौषधं मया क्षतं तदेवान्येनापि क्षतमित्यादिदर्शनादिति भावः।

इति श्रीमहामहोपाध्यायविद्यानिवासभट्टाचार्य्यपुत्रश्रीयुत विश्वनाथपञ्चाननभट्टाचार्य्यविरचिता सिद्धान्तमुक्तावली संपूर्णा ॥

॥ इति सिद्धान्तमुक्तावलीसमाप्ता ॥

Digitized by Google